दिमतेदोषोऽर्थ। भाष्यकैयटयोस्तु समानक्रियत्वस्यानुक्तत्वात्कर्मान्तरव्यावृत्तिफलकं
वाक्यमार्थकमेवेतिचेत्। नाभाष्यमतेपिसमानक्रियत्वस्याक्षेपत्वात्। तस्मानुक्तत्वे एप ६४
ष्वमतात्योतनयासेम तत्त्वात्तत्रअस्यथाश्रुत्याप्रतिपत्तौवोधनगौद्विनीयकसायामतिप्रसं

श॰द॰कौ॰स्तु॰

गात् माभूवाञ्छिकयोः कर्मशब्दस्य क्रियापरतये वक्ष्यमाणत्वात् तु शक्यत्वाच्च॥ अप्युपेत्यापि द्रुमः॥ मारुह्
माण्वमते समानक्रियत्वं तथा। पिदर्शयते भृत्या नरा नेत्सुदाहरणे व्याख्याणे न केयटेन अणौ
यत्कर्तृकमेणीत ढ्विक्रं कर्मव्यावर्त्यमेनेइति नावत्स्पष्टीकृतम्॥ तथा च मनुष्या नित्यस्याणौ कर्तृ
पागत्पर्थाद्गृहणौ कर्मत्वेपि दुर्धो आत्मनेपदं॥ मनुष्यस्थलयो रणौ कर्तृकर्मणो रेवेह कर्मा तया
नरितात् कर्माभावात्॥ अक्षि॥ सकर्तृत्वंशोपीह नास्ति। हस्तिन एव कर्तृत्वात्। पादेनता॥ आरो
हयमाणाः स्व आणौ कर्मणो हस्तिन एव कर्तृत्वं स एवस्थलमारोहतीत्यत्रापि कर्तेति। तदवत्वा
न्त्यासन्निवलेनैवातिप्रसंगभंगात्॥ तथा हि। एपेनात्मनेपदं स्यात्सणौ यत्कर्म सचेत्कर्ति
त्यप्रत्यासत्ते रेतदुम्पते। येन णिचाणौ तात्मनेपदविधित्सितं तत्प्रकृतौ यत्कर्म सचेत्क
र्तेति। इह तु यत्रायमुपाधिः कृतम् एवं तत्रात्मनेपदं॥ आरोहयमाणादितियत्र तु न कृतं स्थले
मारोहयन्तीतिनत्वायमुपाधिरस्तियेनात्मनेपदं स्यात्॥ यत्तु हरदत्तेनोक्तं। हस्तिपका
नारोहयतिहस्त्यारत्र माभूदिति। तन्नेदं चक्रमं। किमिदमध्यारोपितप्रेषणा पक्षेद्वितीय
कल्पायामुदाहरणं किं वा निष्ठतप्रेषणापक्षे इति। नाद्यः। णिज्वाच्यव्यापारभेदेन समानक्रि

श॰ प्र॰ यत्वाभावात् । न द्वितीयः । तत्राद्ययोः कृत्स्नयोरण्यन्तत्वात्तद्घटितस्य स्पोतह इति नः कर्तृत्वायोगात् । द्वि
६५ त्तिपक्षे नो कर्मत्वासंभवाच्च । तस्माच्चतुर्थी परिशिष्यते । तत्रापि स्पष्टचतुर्थपर्यवसानेन
कर्मणो न त्वयः स्पष्ट एव । अस्मादेतत् । दर्शयितुमभृत्याप्राजेति नाबद्धाष्ये स्वीकृतं तस्य मर्थनाश्र
णो येकर्तृकर्मणो नहितः कर्मत्वं च्छेदो भिन्नतद्दत्वाहक्वैयत्नः न स्पाप्यय माशयः अण्य
न्तकर्मत्व तत्र कर्तरि किमर्त्यन्तोनुद्वंतकर्त्रीत्वेन तस्य भपापि परिणम्यते । पञ्चधर्मपादिति नपुंस
कमनपुंसकेनैकशेषः ते न कर्मकर्त्रोर्णौ कर्मत्वेप्यदोषः एवं च कर्मण्युपगो हयन्तं निष्पादि
तमिति भाष्यप्रयोगोप्युपपद्यत इति । एवं स्थिते निहन्तृप्रेषणाध्याहारोपितप्रेषणप्रयोजनयोः
रपि वा मक्कर्मायामकर्मतया भाष्यकैयटादिग्रन्थाः सर्व एव नविताः स्युः स्मात्किं हाहन्तु अन्ये
वपर्यप्रयोगेन । एतावान्तेविहितं भेद भाष्यमतेः णिगकर्तृकर्मणो रितिव्याख्यानादुदाहरण
मिदं द्वयतिकारहार हन्ता ह्मिनेतव घन्तु हारणं । अणो यत्कर्मत्वे व्याख्यानादिति । अत्रोच्य
ते । अनयपक्षा वतद्रूढ्राः वाधेह देत्य सा स्याः क्विं हत्वे न्याद पिवाध्यतामिति त्यागानमिमाप
रायां न्यायो घोषः रत्पत्रगभीरनदी पदार्थयोर्भेदबोधानन्तरं तीरजरागायामपि प्राथमिक ६५

कबोधमादायगंभीरपदमार्थस्वरूपंविहायाध्यारोपितनद्विशेषणपक्षे द्वितीयकक्ष्यायांकर्मत्वप्रवृत्तिने
तोणिजर्थस्यैवकर्मणोपित्वागोणत्वात्कर्मपदस्यचप्राथमिकबोधमादायकर्थवित्वार्थक्याद्द
त्रापसंबंधोलक्षणोत्सम्भुपगमात्एषैवार्थवादे प्राशस्त्यलक्षणायांगतिरितिकैयटस्योक्ति
स्वभावोबोध्यः॥निष्कर्षस्तुकर्मवद्भेदवाक्यार्थोभाष्यवार्त्तिकयोरनभिमतएवाव्यक्तरीत्याप्र
योजनाभावात्।ग्रंथस्तुकर्मवद्भावस्याक्रियापरतायांतस्यएवावदाहरणेषुभ्रस्यानित्यादेरविव
क्षायांकर्मव्यापारमात्रेविवक्षितेसिद्धंभवतीत्येवाशयोबोध्यः स्मरयत्येनंवनगुल्मः स्वयमेवे
तिभाष्यस्थस्योव्याख्यावसरेएमितिकर्मणोऽविवक्षायांकैयटहरदत्ताभ्यामुभाभ्यामपिशाणी
कृतत्वाच्च।यत्तुसूत्रशेषेकैयटेनेनमित्यस्यविवक्षेतिपुनःप्रतिपादितंनरेवत्वापानतइति
दिक्।तस्मात्भस्त्यादीनांपरित्यागोस्पष्टाभेदपरिग्रहोताकर्मवाक्येचतादर्थ्यवर्णनात्म
वमुञ्चनं॥स्यादेतत्॥सकर्मकाणांसर्वेषामंशयाभिधायितयाकर्तरिकर्मवद्भावातिदे
शादेवसिद्धानाहन्यूलोदाहरणानितानवाध्यारोपितविशेषणपक्षेप्याते हन्यतोहस्तिनःकर्म
त्वाभावात्समानधातौचकर्मवद्भावेनपचत्योदनंदेवदत्तोपचत्योदनःस्वयमेवेति

श॰ वृ॰ प्र॰ त्वत्कर्मत्वं ज्ञायते न प्राप्नोतीति वाच्यं । निरुक्तविशेषणतया क्रियायामेव प्रकारतया संसर्गग्रहात् ॥ अथ धात्वे
६६ पितविशेषणापन्नपरित्यागे विशिष्टस्याभावात् तत्र च दृष्टौ कर्तृत्वस्याभावकतया दृष्टेश्च कर्तृत्वस्य क्रियत
या कर्मत्वं ज्ञायते न प्राप्नोतीति वाच्यं । एवमिच्छादिप्रयोगेऽपि लक्षणापत्त्युक्तप्रायास्तत्वात् ॥ विक्लेदन
द्विधाभवनयोरपि कर्तृत्वस्यानाप्त्यैव कर्मवज्ञावातिदेशप्राप्तेति विषयतापक्षे । तत्र व्यापारांशस्य
कर्तृत्वे विक्लित्तिद्विधाभवनरूपफले कर्मस्थे यदि तर्हि ईदृशिफलयोरपि विषयत्वस्याभावो
कर्मस्थ इति तदुल्पात तस्मादिह वेदव्यवहारं कर्तृत्वमिति चेत् ॥ अत्राहुर्भर्तृहरिः विशेषदर्शनं य
त्र क्रिया तत्र व्यवस्थिता । क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता इति । अस्यार्थः । यत्र क्रिया
व्युत्पत्तिविशेषो दृश्यते यथा पक्षेषु तण्डुलेषु यथा वा त्रिषु काष्ठेषु तत्र क्रिया स्थिता । तेन
पच्यते ओदनः भिद्यते काष्ठमिति कर्मवज्ञावः सिद्धः । अन्येषां मते अन्येषां धातूनां त्वशब्दैरेव
क्रियाव्यवस्था । शब्देन कर्तृव्यापारस्यैव प्राधान्येनावगमात् कर्तृस्थतेत्यर्थः । उद्देश्यतावच्छे
दिकत्वेऽस्य शब्दविशेषव्यापारांशस्येति श्रोताः । किं नियामकं बोध्यं तदिह दर्शनरीत्या राम
णात्तो विषयेऽस्मत्ते न विशेषात् तूपलंभात् कर्तृस्थ एवेह भावः क्रियायाः ॥ उद्देश्यतावबोधाद्या अ ६६

दृपश्पेपमितिस्तुदेशः। न त्वयं विषयो भवत्विति एवमहमुपालिंगबेपामित्युपदेशोन तद्धलिनोम
ग्रावोभवत्विति। उपालिंगमनरू ११ एवच व्यापारविशेषो हेरथो नित्वस्य प्रावनमात्रे। भूमिषु
झस्पशाखो हस्ताभ्याम वनमधस विश्वारो हनी व योगातात्र्वनएवयद्वितपरं बंदसीत्यत्रभाष्ये।।
दाहिर्गत्पर्थ इति अनएवचाणौ कर्तृणौ कर्मत्वं। पविछिद्यात्तु विक्लिन्निछिधाभवनरूपो विशे
षः। कर्मत्वाहि इष्टः। तद्दुद्देशेनैवकारककृव्यापार इतिमहद्वेषस्य। एवंचानसत्तेहस्तीतिकर्मवत्त्वा
वंगदर्शयंतोभाष्यस्याथविरोधाद्वपेक्ष्याइति कैयटः। एतेनअधिगच्छति शास्त्रार्थः स्मरतिश्च
इधातिचयत्रूपावशानलस्मेनमोक्गुरुवैसदेतिप्रयोगोव्याख्यातः। नवेवक्रियतेइतिन
स्याहितिकाव्ये। यत्वार्थतावाहिनामेनदोषग्रसंगे। पिमूवाहिसूत्रस्थभाष्यानुसारेणाकर्तरीन
एभूतनधात्वभीवार्थतामप्युपगच्छतामस्माकंमपूर्वसामंजस्यात एवंचकर्तृस्थभावकक्रियेषु
कर्मवत्त्वावाधानेविध्यर्थमिदं सूत्रमिति स्थितं नभाष्ये। नावयनेस्वयमेवेत्पादौतुकार्योति
देशापक्षेपरत्वात्कर्मवत्कर्मणेत्येवात्मनेपदं। शास्त्रातिदेशेतुभावकर्मणोरित्यनेनत
पेक्षयापरत्वात्स्योरणामितिवत्रणोस्यवधेयोपदित्वणो येक्कर्तृकर्मणोतद्भिन्नकर्मेतिद्वागे

सा॰ह्॰प्र॰ मध्यिह्नतो मिषेतास्यात्रहिं सकर्मकाणामप्येतत्सूत्रोदाहरणानापत्तौ कर्मस्थक्रियाणामपुदाहृताणांस्युःन
६७ हितत्रानिर्देशः स्वलक्षणः कर्मवद्धकर्मकाणामिति वक्ष्यमाणत्वात्॥ नथानियमार्थं त्वपाणामंगयक्षिणो
प्रतिषेधार्थत्वे स्यादिभाष्यवार्त्तिकयोर्यथानामप्यसामंजस्यं स्यादित्यादिदिक्॥ तस्मादिहास्मदुक्तमेव
ववाक्यार्थत्वे यं तुनित्रयसंमतं। तथाहि तस्यापक्ष्कारहास्दत्वकेयटादिसकलग्रंथकाराणामिहमु
ह्रानेव पूर्वोपराविरोधो विपाछिछ्रि रूढ्रतेष्यः॥ अस्मदुक्तिस्कमातात्मयेमुत्सार्यपरिभावनीयमल
वहुना। यत्तुकरेणुरारोह्यते निषादिनमिति माघे प्रयुक्तं तण्णिचश्चेति सिद्धं। एतेन मलंनतं दर्शय
तेगतस्मयः कृताधिपत्यामिव साधु वंधुतामिति माघ्योतं। वंधुतातंपश्यति तां दर्शयते। पद्मावंधुतो
कृताधिपत्यामिवलोकः पश्यतितां दर्शयति इत्यर्थः॥ आद्ये वंधुतात्रणोकर्त्री। द्वितीये त्वतो साक
र्म। अथ यथा विणोकमेत्वं नि विवादमेवेतिदिक्॥ णरितिकिं॥ आरोहतीति निष्ठुरप्रेवणान्मा
भूत्॥ न च तोयं वैदितिवाक्यशेषेक्ष्तत्वात् सेवं भविष्यतीति वाच्यं। अणाविस्तस्याविकलत्वात्॥
किंच गस्तपर्थेमव पश्ये णोरितिवाच्यमेव नारिहेवसार्थमुक्तं॥ हेतुमत्यस्मिन्ग्रहणार्थं च॥ मीस्यो राम
लस्पेवसंभवात्॥ तेन गणयते गणः स्वयमेवेति सिद्धं। गणपतिर्हि विमस्यभागशोवस्थापनेव ६७

नो।तथा च कर्मस्थभावाकारात्स्मान्निवृत्त शेषणो कहेतुमणौ पुनः शेषणो शत्यागे सत्यात्मने प्र
मिष्टे।णो रिति हेतुमसि चार्थे निधानाद्रणा विस्पत्रापितस्यैव ग्रहणा ह्युदाहिणोयत्क मं जिक त्वंका
ह्येतुमएवं तादापि सिध्यतीति। एतदुक्तविरुद्ध नाग णायन्ती स्यैव रूपमवस्थाचेत्तु द्वयेपुदाक्लिय
ते।तत्र संख्यानिमित्तकस्य परिछेदस्य ज्ञानविशीष्टात्मकनया कर्तृस्थस्य धातुवाच्यतानामा
श्रित्य कर्म च ज्ञावाघ्रत्वस्मा।द्वितीयावस्थायां पात्मैपरस्मुपपादनीयं।चतुर्थावस्थायांतु पर
स्मैपदमप्युक्तमेव।णोरणा विस्पत्रापित्रणावकर्मका।दिसत्रैव हेतुमसि वएवग्रहणात्स्यन्मा
ग्यत्वात्।।तथैव भाष्येऽस्थितन्याद्य।भागशोवस्थापनपरत्वेन तु द्वितीयावस्थायामप्यात्म
नेपदमिति विशेषः।कर्मवद्भावस्य दुर्वारत्वात् ताच्छिणो नतिश्रंथीत्साहि निषेधात्तत्र
इति दिक्।णौचेदिति किं निहस्रुजे व णोणौ आरोहयंति हस्तिपकाइति ततीयकस्यायां मा
भूत।अमुमति हिणोचे ह्यहाणो अनत्वाह णावेव कर्मत्वं कर्तृत्वं च सम्भ्यपेता।।न चैकस्याभय
पनावाधितेति वाच्यं।प्रथमावस्थायां कर्मणो द्वितीयावस्थायां कर्तृत्वस्य निर्विवादत्वा
त्।अनाध्यानातिस्मारयति वनगुल्मं कोकिलः।।न न षष्ठतु थावस्थायां स्मारयति वनगुल्मः।।ग्लं
स्मः १

रा.वृ.प्र. न पूर्वकस्य नो विषयो भवतीत्यर्थः ॥ स्फुरत्याधानो सूदाहिः ॥ ॥ भीस्म्योर्हेतुभये ॥ ॥ आभ्यामात्मपता
६८ स्पा मात्मनेपदं स्यात्प्रयोजकाद्देव चेद्भयविस्मयौ तः ॥ हेतुभयग्रहणं विस्मयस्याप्युपलक्ष
णं ॥ मुण्डो भीषयते भीषयो हेतुभये षुमिति षुक् ॥ बिभेतेर्हेतुभय इति वैकल्पिकात्वपक्षेतु भाप
यते अत्र पुक् ॥ न द्विधा चीकारप्रश्लेषात् जटिलो विस्मापयते ॥ नित्यस्मयतेरित्यात्वं ॥ अत्रहि
तिर्युक् ॥ हेतुभये किं कुञ्चिकया भापयति रूपेण विस्मापयति ॥ इहकरणाद्भयविस्मयौ न
हेतो ॥ यद्यपि हेतोर्भयापारोपणाद्विधा तात्प्रयोजकसाधनता तुर्वोपन्त थापि हेतुस्वरूपमेवात्र
निरपेक्षं धात्वर्थप्रयोजकं चेदित्यर्थः ॥ विशेषणोपादानसामर्थ्यात् ॥ अत एवमोक्षेत भाष
यतीत्यत्र न मोक्षया व्यधर्मस्य भेदेन विवक्षणात् ॥ उदाहरणे तु तादात्म्यविवक्षणाद्धेतोरे
व भयो ॥ एतेन मनुष्यावा वामनुवंशकेतो ॥ विस्मापयन्निति आख्यातं ॥ इह हि नासिंहो हि स्म
यः ॥ किंतु मनुष्या वा चैतिकरणात् ॥ अत एवावामनुवंशकेतो ॥ विस्मापयन्निति व्याख्यातो ॥
इह हि न सिंहो हि स्मयः ॥ किंतु मनुष्या वाचैतिकरणात् ॥ अत एवात्र नित्यस्मयतेरित्या स्म
त्वमात द्विधा ने विभेतेर्हेतुनय इत्यतो हेतुभयात् तुभयोपाभयग्रहणं स्पष्टमस्ययोपलक्षणान ६८

स्वायो नानाकवित्तविस्मापयन्ति तिपुराणगमयाद्यः षामाह्निकः यष्ट्यावाकू विस्मापयतेऽपि हस्त्कवि
स्मापयमानां वाचं प्रयुङ्क्ते विस्मापयति। एपेनास्मिचा वाचेतितु प्रयोज्ये कर्तरि इति तृतीयानेन्तु करणे
इति समाधेयं॥ गृधिवंच्योः प्रलंभने॥॥ अतारणा थोम्पामा म्पोलपं ताम्पांमात्मनेपदं स्यात्॥ मा
णवकं गर्धयते वंचयते वा। प्रलंभने किं। श्वानं गर्धयति॥ अभिकांक्षामस्योत्पादयतीत्यर्थः॥ अ
हिं वंचयति वर्जयतीत्यर्थः॥ ॥लियः संमाननशालीनीकरणयोश्च॥ संमाननशालीनीकर
णयोश्च वर्तमानात् प्रलंभने च वर्तमानाण्ण्यंतात् लीधातोरात्मनेपदं स्यात्। लीङ् श्लेषणे दिवादिः। ली श्ले
षणे क्र्यादिः उभयोरपि ग्रहणं॥ निरनुबंधकपरिभाषा तु प्रत्ययविषयिणी॥ वामदेवाड्ड्याडि
ति डित्करणात्तत्रैव प्रवृत्तिर्हि सा। तापकं च सजातीयविषयकमेवेत्युत्सर्गः। संमानने जटाभिरा
लापयते। पूजां समधिगच्छतीत्यर्थः॥ अकर्मकत्वापेधात्वर्थेनोपसंग्रहीकृतकर्मत्वात्। पुत्रीयंती
त्यादि च त। शालीनीकरणे। श्येनो वर्तिकामुल्लापयते। न्यक्करोतीत्यर्थः॥ प्रलंभने बालमु
ल्लापयते। विभाषा लीयते इति णात्वं विधीयते। तद्विषये नित्यः। अन्यत्र तु विकल्पः।
त्य चाख्यितविभाषा हि मानवनीयते इति विहितमात्वं कथं लीनातेः स्यादिति वाच्यं। लीनाति

शा॰कृ॰ तिलीयस्यार्थकानिर्देशोयमितिसिद्धान्तासमानमाहिष्वितिकिंवालकमुद्धापयति।आश्लेषय
६९ तीत्यर्थः॥मिथ्योपपदात्कृञोभ्यासे॥एपं तात्कृञो मिथ्योपपदात्मनेपदं स्यात्सौ नः पुत्पे। प
दं मिथ्याकारयते। सा पवा स्वरादि उच्चमसकृदुच्चारयतीत्यर्थः॥ नित्यवीप्सयोरिति द्वित्वं तु न
भवति॥ आत्मनेपदेनैवाभ्यासस्यद्योतितत्वात्। करोतिशब्दो ह्येधत्वाद्वृत्तिरकर्मकः एषनस्तूच्चार
णावृत्तिः सकर्मकश्चामिथ्योपपदात्किं स्वष्टुकारयति कृञः किं। पदमिथ्यावाचयति। अभ्यासे
सकृत्पदं मिथ्याकारयति। स्वरितञितः कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञितश्च धातोरात्मने
पदं स्यात्क्रियाफलं कर्तृगामिति यति। यजते सुनुते। कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञित
श्च धातोरात्मनेपदं स्यात्क्रियाफलं कर्तृगामिति सति। यजते सुनुते। कर्त्रभिप्राये किं। यजंति
याजकाः सुन्वंति। हविश्च्यादिस्तु न फलं। वक्ष्ये हिंह्रसाया। प स्वार्थस्य प्रसिद्धयर्थमारभ्यते पया
ह्यः। न स्वधानं फलं तेषां तलाभादि प्रयोजनमिति। पचापाकं पितामहः। केचित्तु प्रयो
जककव्यापारवृत्तिस्पोधात्त्वस्य लघोतकमात्मनेपदमनेनविधीयते। कुरुते कारयतीत्यर्थः। एत
कारयतेरस्सत्त्वं तुप्रयोजककव्यापारहृद्यमर्थः। ताजंताशिचियथाकर्त्रभिप्रायस्तेनिस्वर्णांशोपि ६९

कर्त्रपरसमवेतकर्तृपरत्वादुत्कर्षार्थतात्पर्यक एवेत्याहुः । गर्हे च हरिणा ॥ क्रियाप्रवृत्ता वा व्योना कैश्चित्स्वार्थपरा
र्थता । असतीवासतीघापि विवक्षितनिबंधना ॥ केषांचित्कर्तृभिप्राये चासह विकल्पते ॥ आत्मनेप
दमन्येषां तद्वदर्थप्रकृतिर्यथा । कीर्णाद्विषपवते धत्ते विमोति चिनुते पिबा आत्मप्रयोगाद्दृश्यन्ते ये पुराप्यर्थमि
धीयतइति । असतीवेत्यनिमकमतद्वनोद्दार्नेकुर्वते येइत्यादयः प्रयोगाः समर्थिता । तत्रापि स्वार्थतावि
क्षायाः संभवात् । तदर्थस्यपाचकर्तृघोमकं वा आत्मनेपदमिति मतद्वयं संगृहीतं केषांचिद्विवक्षा विना श्री
केन चिनोति चिनुतइति विनोति चापपतिवेति क्रमेणार्थः ॥ ॥ अपाद्वदः ॥ ॥ अपपूर्वाद्वदतेरात्मनेपदं
स्यात्कर्तृगामिनि फले संविधाने वान्यायमपवदते । कर्तृभिप्राये किं । अपवदति ॥ णिचश्च ॥ णिजंता
दात्मनेपदं स्यात्कर्तृगामिनि फले संविधाने चाकटं कारयते कथं कृतं श्मश्रुरापितम्प्राणि कारयतीति
भाष्ये । संविधान इति व्याख्याने भविष्यति । आद्यपक्षे तु कर्तृगामित्वाविवक्षायां भविष्यति । अत्र क
श्चित्तत्वज्ञपतेः स्वरितेत्करणाज्ज्ञापकात्सुरादिणिजंतादिदमात्मनेपदं न भवतीति । आह वा स्वरिते
त्वाद्धरिः नुपादौ न णिदौ क सुपादिधिति तं इस्फुणिजभावपक्षे स्वरितेत्त्वस्य सार्थकत्वान्नोक्तेर्थे तापक
नाग्नत सुपादेरप्ययं विधिर्भवत्येवेत्याह । मैत्रेयस्तु स्वरितेत्त्वमस्पनाकरमित्याह । तदेतद्धरदत्तोपि संजग्रा

शब्दप्र. ७० हायमवविर्ष्विर्नचुरादिणिजेनात्मपादितिकश्चननिष्ठितुते स्मात्प्राप्त वचो न किंचनेहृष्टं नश्यते॥ स्वरिते
त्वमनात्येपिति॥॥ समुदाङ्भ्यो यमोऽग्रंथे॥ एभ्यो यमः प्राग्वत्कर्तृगे फले संविधाने च न त्वग्रंथे विषये
आङ्पूर्वकस्य वचनं सकर्मकार्थं॥ अकर्मके त्वाङो यम हन इत्येव सिद्धं॥ व्रीहीन्संयच्छते भारमुद्यच्छ
ते॥ अग्रंथे किं। उद्यच्छति चिकित्सां वैद्यः। इहाधिगम पूर्वकमुद्यमं नयमेरर्थः। चिकित्साशास्त्रमधिग
तमुद्यमं करोतीत्यर्थः। कर्त्रभिप्राय इत्येव। संयच्छति घवत्रिआयच्छति॥ अनुपसर्गाज्ज्ञः॥ अस्मात्क
र्त्रगे फले संविधाने च। अकर्मकाच्चेत्येव सिद्धे वचनमिदं सकर्मकार्थं। गां जानीते। अनुपसर्गा
त्किं। स्वर्गं लोकं न प्रजानाति कश्चिंतर्हिं भहिः। इत्थं नृपा पूर्वमवा नुलोधि तनौ नुजत्ते भमने ह्युतस्पेति
। कर्मणि पर्यनिङ्। नृपेणेति तृतीयांतस्या विपरिणामादिति जयमंगला॥॥ विभाषोपपदेन प्रतीयमा
ने॥ स्वरितेत्यभृति सूत्र आत्मनेपदं वा स्यात्समीपोच्चारितपदेन क्रियाफलस्य कर्तृगत्वे प्रतीते॥ स्वरि
तञितइत्यादि पंचसूत्र्या यदात्मनेपदं विहितं न क्रियाफलस्य कर्तृगत्वे उपपदेन द्योतिते न प्राप्नो
ति। उक्तार्थानामप्रयोगात्। तत्रायं भाविभाषेयं। उपपदं चेह समीपोच्चार्यमाणं पदं न तूपपादिभाषिकं। एव
अशंभवात्। इह च पंचसूत्री अनुवर्त्तते स्वं यज्ञं यजति यजते वा। स्वं कटं करोति कुरुते वा। स्वं जीहिं संय ७०

वक्तुमासंगं जानाति जानीते वा ॥ शेषात्कर्त्तरि परस्मैपदं ॥ ॥ आत्मनेपदनिमित्तहीनाद्धातोः कर्त्तरि परस्मै
पदं स्यात् ॥ याति वाति कथं तर्हि स्मरन्त्यो जुगुप्सनाः ॥ हुरभिघृतधाराकृतिशान्तेरिति सौंदर्यलहरी ॥ सत्यं ना
र्थ शानच् किं तु चानशः ॥ एतेन प्रमानधारे मेने ति माघो व्याख्यातः ॥ अनुपराभ्यां कृञः ॥ आभ्यां कृञः प
रस्मैपदं स्यात् कर्त्तृगेपि फले गंधनादावपि अनुकरोति पराकरोति ॥ ननु कर्मकर्त्तर्ययं विधिः प्राप्नोति ॥ अत्र
क्रियते स्वयमेवेति ॥ नैष दोषः कार्यातिदेशपक्षे कर्मवत्कर्मणेत्यात्मनेपदेन परत्वाद्बाधात् शास्त्रा
तिदेशे तु भावकर्मणोरित्यस्य पूर्वेत्वात्परेण ॥ नेनयद्यपि प्राप्तं तथापीह कर्त्तरि कर्मेत्यनुः शेषात्क
र्त्तरीत्यत्र कर्तृग्रहणादुपमसुवृत्तेनैनकर्त्तैव कर्त्ता न तु अयं विधिर्न तु कर्मकर्त्तरीति बोध्यं ॥ ॥ अ
भिप्रत्यतिभ्यः क्षिपः ॥ क्षिप प्रेरणे ॥ स्वरितेत् ॥ अभिक्षिपति ॥ प्रतिक्षिपति ॥ अतिक्षिपति ॥ एभ्यः किं ॥
आक्षिपते ॥ कर्त्तरीत्येव ॥ नेह ॥ आक्षिप्यते ॥ हृद्यो हृती पक्षे कर्तृग्रहणानुवृत्तेः कर्मकर्त्तर्यपि न ॥ प्राद्वहः
वह प्रापणे स्वरितेत् ॥ प्रवहति ॥ प्रात् किं ॥ आवहते ॥ परेर्मृषः ॥ मृष तितिक्षायां ॥ स्वरितेत् ॥ परिमृ
ष्यति ॥ परेः किं ॥ आमृष्यते ॥ इह परेरिति योगविभागः प्रवहतेरप्यनुवर्त्तनात् परिवहतीति केचिदिच्छन्ति ॥
व्याङ्परिभ्यो रमः ॥ रमु क्रीडायां ॥ अनुदात्तेत् ॥ विरमति ॥ आरमति ॥ परिरमति ॥ एभ्यः किं ॥ अभिरमते ॥

शा.कृ.श.
७२
उपाच्च। उप पूर्वाद्रमः प्राप्त इस कर्मकार्थोयमारंभः। अकर्मकात्तु विभाषां वक्ष्यति। स्या देवदत्तमुपर्
वृक्षोरमि निर्वृत्तिक्रियानाशयोर्वर्त्तते॥ उपरतोध्ययनात्। उपरतानि धनानीति यथा। न त्वा नयोरर्थयो
:सकर्मकत्वं संभवति। सत्यो॥ अनेनर्थे विनापि अर्थो द्योतनार्थः। नद्यथा॥ यज्ञदत्तमुपरमति। उपरम
यतीत्यर्थः॥ विभाषाकर्मकात्। अस्मात्परस्मैपदं वा स्यात्। उपरमति उपरमते वा। निवर्त्तत इत्यर्थः॥ बुधयु
धनशजनेङ्प्रुद्रुस्रुभ्यो णेः। एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्। तणि चशेत्पश्चा पवाद्रः। बोधयति॥ प
द्मं योधयति कोपं। नाशयति दुःखं जनयति तस्य व्यं। इहागावकर्मकादिति न प्रियते॥ अविव
क्षकर्तृकत्वात्। इङः। अध्यापयति। प्रुद्रुस्रूणां निपाताच्चलनार्थत्वेन सिद्धे इत्यस्मान्नव ज्ञानार्था
न्तदर्थवचनं। प्रावयति। प्रापयतीत्यर्थः। द्रावयति॥ विलापयतीत्यर्थः॥ स्रावयति॥ संदयतीत्यर्थः
स्यंदनं इव स्वल्पचलनं। न चैवंच चलनार्थत्वात् सिद्धमिति वाच्यं द्रव वज्जनमतान् छेत्कुप
न त्वाप्यसाति विशेष शक्तेन यास्य विशेषशद्वेष्वपर्यायत्वात्॥ निगरणचलनार्थेभ्य
श्च॥ अस्मिन्निहारार्थेभ्यः कंपनार्थेभ्यश्च ण्यन्तेभ्यः परस्मैपदं स्यात्॥ निगारयति आशयति। भोज एम
यति। चलयति। चोपयति। कंपयति। सकर्मकार्थोऽचित्तवत्कर्तृकार्थश्चायमारंभः। अन्येषु प्रति ७२

वोधिवत्कथं। आदयते देवदत्तेनागतिबुद्धीत्यादिनाण्णौ कर्तुः कर्मसंज्ञा प्राप्ता आदिखाद्योः प्रतिषेध
इति वचनान्न भवति कथं नत्वोदयमानं वटुनेति अकर्त्रभिप्राये भविष्यति। कर्त्रभिप्राये प्राप्त्यनिग
रणचलनेत्यस्य ह्यार्थं निषेधेन तु शेषात्कर्तरीत्यस्य। कथं तर्हि श्रीहर्षः इमां किमाचामयसे नच
चुली। चिरं चकोरस्य भवत्वसुस्पृशी इति। सचनायं भक्षणार्थः न पीयतां नाम चकोरजिह्वया कथं
विरेतस्तु त्वंद्वं वै द्विकेति श्वेवोधीतुरीधेन पानार्थत्वादिति वाच्यं। पानस्यापि भक्षणाविशेषात्म
कत्वात सामान्यग्रहणाविशेषस्यापि ग्राहित्वात्। अत्र तथेइव सूत्रेचोपयतीत्युदाहरणाम्। गतेः
बुधे म इगत्यर्थकत्वात्। इमामित्यस्य कर्मत्वासंगतिश्च संगाद्य। जन्मादिसूत्रे एतद्वत्र कर्म्मसं
ज्ञायाश्चप्रत्यवसानार्थत्वेनोविनाद्रुपपादेति॥ अत एव न पादम्मीति सूत्रे गत्यर्थहरणां क्षेत्रप
र्यासान्नं च संगच्छते। अन्यथा पाद्येतेरप्याद्यभिवसानार्थत्वेन निषेधो व्यर्थः स्यात्। नचैवं
बुधयुधद्विसूत्रे द्वरतियहरणां व्यर्थं। चलनविशेषवाचकस्यापि चलनवाचकत्वानपायादि
तिवाच्यं। चलनत्वव्याप्याया अवच्छेदया एव जातेः प्रवृत्तिनिमित्तत्वायास्तत्वात्। पानेतु द
वद्रव्यस्यगलादधःकरणं तत्रद्रव्यांशस्याधःकारणे कर्मीभूतस्याधिकस्याभावे तेभिहस्य

श०कौ०प्र नेऽर्थस्य भानेन निर्विवादः॥ यथा मेदगतौ समानायां गतेर्भाने। अधिकं च विष्टन तु तन्द्वा निरि तिप्याया
७२ ता नवयानन्व मण्य त्वेऽस्य स्नन्त्ववहिति वाच्यं॥ न त्वाधिकानिरूक्तेः दृष्टो नेन्तु कार्य्यं नावहेरकत
या तान्ति हेरिति। उच्यते॥ आचामयेतिलोडन्तं छित्वा॥ किं नाचामयो रितिप्या स्येदं॥ मिद्दति न
संबोधनं दमयं स्मा तथा हि॥ अस्य स्त्रीई न स्मीः तया सह वर्त्तमानामे नस्माः संबोधनमे॥
मलक्ष्मी केरत्य र्थः॥ आणाव कमेवा चित्तवन्नेव्कात्ता॥ णौः पूर्वमकर्मका चित्तवत्कर्तृके
काल्पेता त पास्मेपदं स्यात्॥ शेते कृष्णं नेशाययति गोपी॥ अणौ किं॥ आरोहयमाणे हस्ती
कर्क्रारोहयते॥ णेरणावितिसूत्रे उदाहरणत्वेन योकर्मकोणिर्णी तस्तस्माद्द्वितीयेणो ना
भूत्॥ इहि णाव कर्मकः नि हन्नेव्र मणाध्याये पितडेघणाशौ क्रमयोरपित्यन्मग्रवती लत्थैप
र्यवसानस्मो क्त्वात्ता अकर्मका त्कि। कटं कुर्वाणं प्रयुङ्क्ते कारयते॥ चित्तवत्कर्तृकात्कि। ब्रीही
न्शोषयते॥ अत्र केचित्तु चुरादि ण्यन्ता हेतुमण्णौ अणाविस्मस्य त्तुदाहरणामाहुः तन्नप्रा
प्ताद्विविरूद्दं तथा हि चुधारि स्वत्रार्हिणो रित्यनुवर्त्तनेन चुधादि म्प्रप्य हेतुमणि वैर्सभवतीति राम
निर्षेधापि प्रत्यासत्त्या स्येवमाप्यः नेन चुरादि ण्यन्तादपि हेतुमण्णौ भवस्येवैदंपार्श्येपदमिति ७२

सि॰ तेनयत्तु रूपयन्तं प्रयोजयति रूपयतीति केन विग्रहस्तुदाहृतं न चुरादिणपेनाद्धेतुमण्णिचं विधाय त
स्य वासो कुर्योति शाया प्रयोजकव्यापारविवक्षायां प्रयोक्तव्या पारमात्रहृष्या अकर्मकता माश्रित्य न
तो द्वितीये हेतुमण्णिचि लोपः इष्टः। अत एव प्रयोजयतीत्याह। इह हि यणिजन्तानां चावयवसुक्तिर्द्वयं च
वदना हेतुमण्णिच इष्यते सूच्यते। अन्यथा वयुक्तः इत्यविवादर्शीयिष्यता। एवं च तेन यमानमद्वैसंप्रसुद्धे
चेतयत इति केषां चित्सुदाहरणोपहतिक्षनाह्यषितनत्समर्थितं भवति। स्वार्थण्यन्ताद्देकस्मि
न्नेव हेतुमण्णिचोऽनुरूपयतीति चेनयतीत्यवबोधः। नपारस्पाश्रमाश्रसंपरिष्ठहहृविभूतिवत्स्व
एष्वोण्यन्तेभ्यः पाक्ष्ये परं नस्पातां। तत्रापि वदति णिगरणार्थः इतरे विभवत्कर्तृकाः इति श्वलनार्थोपि। तेना
णावकर्मकादिति निगरणाचलनेति च प्रायमिहेति सिध्यते। पापाने पायते पारितण इत्यर्थं त्वनन्
न्यत्रेत्यधिकरणाल्लुधिकारणयोरल्लुविकरणस्यैवग्रहणमिति परिभाषया तेना णावकर्मक
त्वविरहायां पराक्षेपदं भवत्येवपालयतीति॥ पातेर्लुग्वक्तव्यः इति लुगागमः रस्तु उपशमो रम्यते।
आङ्पूर्वोयमत्र पारमैः॥ आयामयतो। नकम्पमिच्छामित्यतो नेत्यनुवर्तमाने यमोपरिवेषणे इत्य
नेनामित्वं ता प्रतिषेधः ङ्कारविशिष्टस्यापादानमुपसर्गत्वेति फूरपर्थे तेनान्याश्रितादाकारस्पर

श.वृ.प्र. स्मना। आङ्पूर्वौ यमयसौ। आयामयते। आयासयते। परिपूर्वो मुहश्च। परिमोहयते। रोचयते। नर्तयते। वा
७३ दयते। वासयते। वस आच्छादने इत्यस्य लुग्विकरणस्य। त्वादस्य ग्रहणं। पादिषु धेट उपसंख्यानं। धापये
ते शिशुमेकं समीची। इत्यवसानार्थत्वाद्वास आच्छादने इत्यस्य लुग्विकरणस्य। त्वादस्य ग्रहणं। पादिषु धेट उ
पसंख्यानं। धापयेते शिशुमेकं समीची। इत्यवसानार्थत्वाद्विशुमित्यस्य कर्मत्वं। समीची इति प्र
थमाद्विवचनं। छन्दसीति पूर्वसवर्णदीर्घः स्यादिति तत्। वत्सान्पाययति पयः। दमयतीति कमनी
यतामहं। अवीवदद्वीणां परिवादकेन। मिन्नावासयतीत्यादिप्रयोगो तर्हि कथमिति ब्रूते।
अत्राहुः। कर्त्रभिप्रायस्यात्मनेपदस्यापवादोयं हि हितपरस्मैपदं तस्यैवायं निषेधः यद्व
कर्त्रभिप्राये शेषादिति परस्मैपदं तन्निषेधमेवेति। वाक्यभेदेनात्र परस्मैपदं वा स्यात्। तो हितायतिलो
वाक्यप॰ हितापतो नहि परस्मैपदाभावपक्षे लकारो एवञ्च येतनन्वात्मनेपदं। तस्य प्रकृतिविशेषेर्थविशेषे च नियत
त्वात्तमत्वं। पूर्वसूत्रेनावस्पवादमयनयतावा तिषेधेनात्मनेपदं इत्येन इति निर्विवादं स एव च प्रति
षेधः सूत्रानुवर्त्यते। तदनुवृत्तिसामर्थ्याच्चेहात्मनेपदविकल्पो सिध्यति। आत्मनेपदग्रहणस्याविनाभू राम
नेङ्निषेधेनात्मनेपदस्य लक्षणाया उपस्थितेरवदत्मैव विकल्पना तु। तेन सुक्ते शेषात्कर्तरीति पर ७३

मंविष्यति॥ अकृत्स्नार्थे नियमपक्षे एकवाक्यतया विधिपक्षे तु पक्षे परस्मैपदविकल्पे पि न क्षतिरिदं पर
त्यवधेयं॥ द्युद्भ्यो लुङि॥ १॥ द्युतादिभ्यः परस्मैपदं वा स्यात् लुङि॥ अद्युतत्॥ अद्योतिष्ट॥ अनुदत्त॥
अलोपिष्ट॥ लुङि किं। द्योतते॥ लोचते। अनुदात्तेत्वान्नित्यं प्राप्ते। न चेह विकल्पानुदात्तेत्त्वमर्थो॥
अनुदात्तेत आत्मने न प्रति विहितस्य परस्मैपदस्यानेन न प्रतिषेधे वैरूप्ये न लक्ष्येलक्ष्ये त्वङ्गीलो वपादि
कस्यात्मने पदस्य सिद्धेः। सत्यं। परस्मैपदे प्रतिषिद्ध आत्मनेपदं न भवती ति ज्ञापयितुं त्वा
नुवृत्तिनेनानुकरोतीत्यादौ पाक्षिकमात्मनेपदं भवति। यदा त्वनुदात्तङित इत्यादिसूक
रणो नात्मनेपदमेव विधीयते। शेषादित्यादिना च परस्मैपदं तदानुकरोतीत्यादौ परस्मैप
देनात्मनेपदं बाध्यते येन नाप्राप्तिन्यायात् पक्षे आत्मनेपदमप्यस्मिन्नर्थे चेदवाग्रहणमित्य
वधेयं। पक्षद्वयमपीदमनुपपन्नमिति तत्त्वमाष्येस्थितं। प्रसवस्योपलक्षणमिति
तन्त्रे नियमलक्षणानि विधिरूपेणापवादत्वमिति परहृदयस्थापितत्वे निरूपितमस्माभि
स्तद्दृष्टेनस्माज्ज्ञाप्याडल्पिन मित्यवधेयं॥ वृद्भ्यः स्यसनोः॥ वृतु वृधु शृधु स्यन्दूभ्यः परस्मै
पदं वा स्यात् स्ये सनि च। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। न वृद्भ्यश्चतुर्भ्य इति निषेधात् परस्

श॰कौ॰ वर्त्स्यति॥ अवर्त्स्यत। विवर्त्सति। वृतो स्यसनोः किं। वर्तिता। ननु द्युतादिभ्य एव वृतादयः पठ्यंतां तथा च न
७४ कर्कौ ङिन्न्यायेनेयं प्राप्तिर्द्युभ्यः पूर्वां प्राप्तिं बाधेत। नन्वत्थाप्युक्तवर्त्स्यतीति लुङि पूर्वेणा विकल्पो
न सिध्येत। न तथा चोक्तं सूत्रे चकारः क्रियते लुङीति विशेषविधिना स्यसनोरियं प्राप्तिर्मा बाधी
ति। अन्यथा ह्युक्तयोरपि विहितत्वादनेनाभावात्तेने नैव सिद्धे किं चकारेणेति चेत्॥ सत्यं। द्युतादिपाठसाम
र्थ्याद्धृतानि विषयीलुङिष्यविषयानि। यद्वा लुङीति स्वरितत्वानि ष्यानि॥ लुटि च क्लृपः॥ लुटि स्यसनोश्च क्लृ
पः परस्मैपदं वा स्यात्। कल्प्तासि। कल्प्स्यति। अकल्प्स्यत। चिक्लृप्सति। तासि च क्लृपः इतीट्प्रति
षेधः। कल्पितासि। कल्पिष्यते। अकल्पिष्यत। चिकल्पिषते। इह हेतोर्निषेधो नास्ति। तत्र हि गमे
गमेरिट् परस्मैपदेष्वित्यतः परस्मैपदेष्विति तदनुवर्त्तने न तु इत्वात्मनेपदेषु इत्युभयत्र स्त्यपि वा। स्यादेतत्।
स्यसनोरित्यस्य वेति त्वमेवास्तु वाक्यभेदेन विधानार्थं तथा। तथा च स्वरितेनाधिकारः इत्ये
व सिद्धे किं चकारेण। सत्यं। स्पष्टार्थश्चकारः। अत एवानुकर्षणार्थाः सर्वे चकारा भाष्ये प्रत्याख्या
ताः॥ ॥ इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकं पादश्च समाप्तः॥ राम
॥ॐ॥ आकडारादेका संज्ञा॥ ॥ इतः ऊर्ध्वं कडाराः कर्मधारये इत्यतः प्रागेकस्यैकैव संज्ञा स्यात् ७४

त्रयोर्द्वयोः सावकाशत्वे विप्रतिषेधे परमिति परैव निरवकाशत्वे तु पूर्वैवेति विवेकः ॥ तत्र परा यथा ऽक्षाहरणं
धनुषा विध्यतीति। शरीणामपायेऽप्यवधिभूतत्वेऽपि धनुषो व्यधने प्रति साधकतमत्वमित्युभयप्रसंगे
परत्वात्करणसंज्ञा अपादानसंज्ञां बाधते। तथा कांस्यपात्र्यां भुंक्ते इत्यधिकरणसंज्ञा। धनुर्विध्यती
ति कर्तृसंज्ञा वा ॥ तदुक्तं ॥ अपादानमुत्तराणीति। निरवकाशायास्तूदाहरणं ॥ अनन्तरत्वदिति। अत्र हि
संयोगे गुर्विति गुरुसंज्ञा लघुसंज्ञां बाधते। तेन सम्बन्धे घुनीत्येन तत्र प्रवर्तते। स्यादेतत्। भय रसंज्ञा
भ्यां न हि अंगसंज्ञां बाधते ॥ तथा च गार्ग्य इत्यत्र यस्येति चेति लोपो न स्यात्। धातुधक इत्यत्रांगस्यो भ
भावाद्व छिन्नस्यात् ॥ अंगसंज्ञात्वकर्तव्यमित्यादौ सावकाशा। न हि धातुप्रत्यये पूर्वस्य भपद
संज्ञे स्तः ॥ अत्र उः स्तुपिवच्च ऊवव नेफल्पेतानि नहि ने षचामादेरित्यादौ स्वादिषु नहि ने षुवां गस्य
कार्यविधानं समावेशस्य ज्ञापकं ॥ द्विविधा हि त्वादयः पजादयो वलादयश्च। तत्र यथाक्रमं
भपदसंज्ञाभ्यां भावेताभ्यां चांगसंज्ञा बाधे निर्विषया एव तन्न हि विधयः स्युः गुरुलघुसंज्ञे वर्णमा
त्रस्य विधीयेते। नदीघिसंज्ञे तु न दत्तनस्येति ताभ्यां समाविशतः ॥ तिनवात्मीवधुरित्यत्र नदीसं
धुनीति पूर्वपदे नोरागन्त ईवात्सी वंधी इत्यत्र गुरोरनृतः निस्वनपु सिध्यति ॥ तथा वि स्मृता यवि श्र

नरोऽर्द्ध इद्येषीति पूर्वनिपातः॥ विनशवाच ष्ठे विनयति। प्रचीन प्रगतीत्यपि लघुपूर्वस्येति णेरयादेशः यथाचापा
शवृप्र. दिशेकृतंच्ये टिलोपोनस्या। निवन्नथाऽचः पा स्मि त्रित्यत्र सुत्यादिने। यत्रहस्के विशेषोभावोवैशृंग्याद्गताच्चल
७५ घूपूर्वा स्त्यणिति॥ तद्वित्येहं हमनो ज्ञादिष्यश्चेति कुञ्जप्रसंगादितिके यतः पुरुष संज्ञा नबाधते॥ तातु दरसेमद्
३ द्विती त्रमो वेति ज्ञापकाता॥ अन्यत्रापि यत्र समावेशइष्टस्तत्र चकारोविस्या नेसाधयिष्यते॥॥ भाष्येतुपा संख्या २
ठेन रमप्युपन्यस्तं॥ प्राकृडारात्परं कार्यमिति॥ अस्यार्थः प्राकडारात्संज्ञाद्वयं कार्ये परस्यादिति॥ सं
ज्ञाप्रकरणाद्धि संज्ञा रूपमेवेह कार्यं परा संज्ञेत्यपि वक्तुन शक्यते॥ विप्रतिषेधेद्दत्तुक्त सूत्रे परं कार्यमित्य
स्यानुवृत्ति यथास्यात्॥ तत्र यस्याः संज्ञायाः परस्याः पूर्वयानवकाशयाबाधा प्राप्ता सा परत्वेन विधी
यते॥ एतदेव ज्ञापकं इह प्रकरणे संज्ञानां बाध्यबाधकभावस्यतेन परयानवकाशया सावकाशाप्र
बाधते॥ द्वयोस्तु सावकाशयो र्विप्रतिषेधे परयापूर्वाबाध्यत इति। अस्मिन्पक्षे अंगसंज्ञापराक
र्त्या। भपद संज्ञेतु पूर्वे। एवं यत्रैव समावेश इष्टस्तत्र सर्वत्र वो द्व्यं॥ अस्मिन्पक्षे अन्वियह तिनासिध्य
पत्र ति॥ तथाहि अन्तोणत्वं द्वितियम्॥ सितिवेति पदसंज्ञे वेष्यते तेन पर कार्यमिति वचनाद्व संज्ञापि तप
स्याद्॥ न तथ अर्थोर्गुणाः प्रमस्येनपदत्व प्रयुक्ते नाघस्य हेतोस्तिन्का॥ तस्मार्थकं स्यात्॥ शेषो बहुव्रीहिः ७५

शेषोक्तमुपसर्जनत्वेनिति शेषग्रहणाभ्यासस्मिन्प्रत्येकं कर्तव्यं स्यात् अन्यथा हि उन्मत्तगंगामित्यादावन्यपदार्थे च सं
ज्ञापि स्यात्. तन्न च गुणाद्यसंगः वक्ष्यमाणस्य वक्तव्यो हि शेषग्रहणं पाठद्वये पि कर्तव्यं॥ विसंवादो न
पाठद्वये पि न कर्तव्यमिति तत्र तत्रैवं चरमः॥ एवं त्ववधेयं॥ एकाशेषेति पाठे पि शेषग्रहणं नक
र्तव्यं। एकेत्युक्तेपि संज्ञाधिकारादेव तल्लाभात्। स्यादेतत् चार्थे द्वन्द्व इत्येवोच्यतां। न हि चार्थे द्वन्द्वस्य तः
पात्रे समुपयुज्यते. सत्यं. तथापि द्वन्द्वस्यापि तत्पुरुषस्याप्युपच छित्वं सभाव्येते. न च सत्त्वद्विमेताम
त्रितसं तयोः समावेशो न स्यात्. न च वाक् उरादित्युक्तेपि बाधकत्वात्समासस्य स्यावधिस्वरूपतीनस्या
दिति चेत्. अभिप्रायात् लिंगाद्यपरपर्यन्तस्तु तत्र बोधि गुणोत्पादः भवति. समावेशार्थं हि तत्र वक्तव्यं
तव्या पूर्वाहि हि गुणत्येवैव वक्तव्यापादः तावतैव दिवः कर्मतत्प्रयोजको हेतुश्चेत्यादि विवक्षया वेशा
सिद्धेः द्विगुश्चेति सूत्रान्तरं तु न कर्तव्यमेव। एवं समानाधिकरणसमासप्रकरणे समासं कर्मधार
यश्चेत्येव पाठ्यं। तत्पुरुषः समानाधिकरणः कर्मधारय इति सूत्रं तु मा भूदिति दिक्। विप्रतिषेधे
परं कार्यं। विरोधे सति तुल्यबलं यत्परं तत्स्यात्। विप्रतिषेधे चात्र धर्मे वर्जनस्योपलक्षणात्तुनीतीति
वत्वं। उपसर्गवशाद्धि विरोधार्थकत्वं। कार्यमित्यत्राहैकस्य तद्वयोरन्यत्रार्थे कृत्यप्रत्ययस्तेन तुल्य

शा०वृ० बलविरोधि इति पर्यवस्यति·नह्यपवादादीनां संनिधौ उत्सर्गादीनां कृतपर्यवसितत्वं॥ तेषां भिन्नत्वात् तन्नत्वानित्यमा
७६ वकाशकत्वाद्बाधकत्वं तदंतरंगं तुल्यबलत्वात्·अपदस्य कृतत्वं न ग्रामात् पातः·तन्न प्रकृतमप्रकृतं स्वस्य विषयः।
नतूक्तं। परनित्यांतरंगापवादानामुत्तरोत्तरस्य बलवत्त्वमिति जातिपक्षे विध्यर्थमिदं सूत्रं व्यक्तिपक्षे तु लक्ष्या
मित्यत्र हि लक्ष्यावकाशयोरन्तरीभूतशास्त्रयोर्द्वयोर्युगपत्प्रसंगे विनिगमकाभावादव्यवस्थितपक्ष
क्षे स्यात्॥ तदुक्तं। अथ पाणिनीयमतेष्वेकस्य बलवत्त्वादिति·तत्रास्मा हूयनात्पाणिनीयेन पदपूर्वस्यापि
निमित्तसमत्वाहितदपि भवति यथाभिधर्मोत्स्वत्र पादालाशिभावे कृते प्लुतस्य॥ तदुक्तं पुनः प्रसंगविज्ञाना
त्सिद्धमिति व्याप्तिःपक्षे नवलक्ष्ये किं विषयकयोर्लक्ष्यणायोरन्यतरवारितार्थत्वासंभवात्र स्वत्रस्थानीप्रामि
वपर्यायेणापि नियामार्थमिदं सूत्रं। विप्रतिषेधे परमेव न तु पूर्वमपि इति एतस्य ग्रहणारंभात् तत्र पूर्वस्या
नारंभोऽनुमीयते तथा च तदुक्तानां चमित्यत्र परत्वाह्नात् ढि कृते स्यान्निवृत्त्यवेन न धित्वं न भवति। तदुक्तं। ह
कृते नो विप्रतिषेधेय ह्याधितं तद्बाधितमेवेति·जातिव्यक्तिपक्षयोश्चलस्यानुरोधाद्व्यवस्थेत्युक्तं प
प्रपाया। नित्यादिषु नतास्य प्रवृत्तिरित्युक्तं। तेनाचे तौ चित्रं तदपधायाः इति ह्वादिपदम प्यानित्यं वा एम
धिसंज्ञरधिनभोरितिनु मेव·न च मोपिशब्दातास्यानित्यपरत्वेति वाच्यं। कृताकृतप्रसंगितामात्रे॥ ७६

पिद्धं चिन्तित्पतात्सुपगमात्। तेन संधयनीति सिद्धं तथा दुडुवरित्पादावं तत्रागउत्तचउ॰ परमपि न तृपधगतां
बाधते॰ तथा पुनः स्त्रियाति रागात्वात्तस्य सा शाद्येति पूर्वत्वो अल्लोपे तस्य नित्स्य स्थानिवत्वोद्दात्तस्यात॰
वरूथा नगरीत्यत्रचासनुपधालोपितइत्तिङीष्यात॰ सिद्धांतेगौरादिलक्षणोङीष् अनउपसर्जनत्वात
यन्नङहस्त्याभाष्ये चकुष्णु नीतिनत्ति हांतेतास्थितं अल्लोपास्सुपगमपपञ्चेष हन्तत्वात् एतन्नु हस्केयते
आभातस्तत्रीयभाष्येकैयटयोश्चस्पष्टमाथसिद्धं यत्तु बङ्ञ्चोत्पेचपविनम्यमिति ङातत्रत्रेभाष्येनरि
हसाधकतया नप्राहा ङाप्यस्य मवगज्ञस्य च उप्रकंतिनित्पनिराकर्तं तस्य प्रहनत्वात्ता हस्तइहेपा
हेतव्यतरंगेणगुणेनदीर्घोविबाध्यतेनचापोग्रपवादः कथं बाध्यतामितिवाच्यं प्रमाणाग्रयेन
स्पवारितात्वे नातत्तथा नवाति कं॰ तेणडिशीनामा डुणः सवर्णदीर्घत्वादिति इहशीनामिति
नदीत्वात्तुट्विभक्तिपरतया नित्पत्त्वीत्वान्नस्मत एव आ नः तुपामितिप्रयोगाः। उत्साहरणं तस्य
पन्ने इंद्रो हस्त्रेः दंसर्वेइहेति घोध्यंलहा नरगावलवंवि तिलाघवत्मा य स्मजकामितिकैयटः
अव॰ परास्मि नि निस्त्रे भाष्यमण्यो चास्य सिद्धं चहिरंगामिति त्ववात्स्वऊ ङित्तृत्स्यग्रहणो नसापिते।
वत्वं तका स्त्रियते नवुनरपवा स्पन्दतनाजातं तेये इति तन्ता सिद्ध मित्पत पापचावे हमिस्या

शब्दप्र· शवैत्वाभावार्थमवश्यमप्रवृत्तीपयागानार्थत्वादंतरंगाबलीयइतितन्कर्तव्येतीहत्यंभाष्यंविरुद्धेत्याप
११ सिद्दतायाउक्तत्वात्· किंच· साप्रवादयाः सिद्धपरिभाषयाकथंनिरपवादयागानार्थता। अथ षत्वतुकी
रसिद्धत्वेनासिद्धंबहिरंगमित्यस्याप्रवृत्तिरपतेवस्ताघ्रतेलाघवात्· नतुनाजानंतर्यइतिसोऽस्वात्· नहि
प्रबलमिदंभाष्यंस्फुटीकृतंवेदमचा· परस्मिन्नितिसूत्रेऽस्माभिः एवंचाचोरानंतर्यनितिहित्वंबिबहितं
नवैत्यास्याऽपिप्राचांकलहास्पदेवाएवंचांतरंगानविधिनलघाधनरत्यपिगत्नार्थः। षत्वतुकोरिति
वाकृतितुयइत्तीनचा: नित्यतात्तापनाता। अधिमानलघपुवेत्यादिनिदृशाद्यतेनगोमत्रियद्धस्या।
रिपिद्वाऽऽचारक्विपिनवमप्रादिवाधोक्तेपेत्यपीत्यरपदयहणस्यकृतार्थत्वात्त्वदीयवलामक
तास्रवासीपियथाकृनाभिप्रायेणोवेत्तिदिक्॥॥ इतिश्रीशब्दकौस्तुभेप्रथमस्याध्यायस्य
तृर्थपादेप्रथममान्हिकं॥ ॥ यस्त्याख्यौनदी॥ इवर्णोवर्णांतौनित्यस्त्रीलिंगौनदीसंज्ञौस्तः॥
दीर्घांतयोरेषासंज्ञाप्यवतिष्ठतेअणत्वेनसवर्णाग्रहणात्· ह्रस्वांतयोस्तुप्राप्नाप्येषापरया लप
धिसंज्ञयाबाध्यते· तेनमतेधेनोरित्यादौअंचार्थनद्यौरितिह्रस्वौनभवति· ननुशेषग्रहणात्त ७७
घिसंज्ञाकथंपवेदितिचेत्· नशेषग्रहणास्यअत्याख्यानत्वात्· तथाहि· एकासंज्ञेतिपाठेनाव

वर्णैर्दयग्रहणं व्यर्थमिति चेन्न एवमपि दकार्थमिति निपातेन्न दीर्घान्तेसावकाशा नदीसंज्ञा तावन्नपुंस
कपोसावकाशा घिसंज्ञा हे मते इत्यादौ परत्वात् घिसंज्ञा धिक्रियते मे तयोर्द्वयोरप्यापादौ चनिरवकाशापि
ङितिह्रस्वश्चेति नदीसंज्ञा घिसंज्ञां न बाधेत. अतःशेषग्रहणं कृतं तदपि वस्तुतो व्यर्थमे
व नदीसंज्ञावचनसामर्थ्यादेव घिसंज्ञां बाधिष्यते इष्टं स्तुल स्यादिति नदीसंज्ञा। सा च यत्स्यया
वेहस्वाहहिरगा तत्रांतरंगायां घिसंज्ञायां घेर्ङितीति गुणे कृते ह्रस्वाभावान्नदीत्वं ज्ञानिविति
षाप्या इत्यनऊक्ते॥ तत्रेवं चनत्रामाग्नापात्र नदीसंज्ञायां घिसंज्ञाया वरतिः यद्वा इत्थं अनुवृत्या चाल्येरपी
तिपूर्वसवर्णः। तेन दीर्घयोरेवेयं नदीसंज्ञा. नचैवं ङितिह्रस्वश्चेति सूत्रे कृतं स्याद्धि अनुवृत्यस्याविति
वाच्यं. विभक्तिविपरिणामेन तयोः सवर्णो यो ह्रस्व इति व्याख्यानात्. उदाहरणं तु गौर्यै वध्वै इत्यादि
स्तुरिति किं मात्रोः स्वसुः। स्त्र्याख्यौ किं. वातप्रम्यै. प्यादेन क्रियमा च ज्ञाते इति विग्रहे स्त्र्याख्यायाः वि
ति प्राप्नोति. आतश्चोपसर्गे इति कप्रत्ययस्य स्पृहस्य स्त्रत्वात् सावकाशः परत्वात् कर्मण्यणा बाधि
तत्वात्. सत्यं. पूर्वविप्रतिषेधात् कः। यद्वा. विच्प्रत्ययोपि विष्यति. एतेन नम्रत्वं वान्यशास्त्र
मिति नेमिनिमित्तम विभ्याख्यातं. नचैवमपि स्त्रियामित्येवास्तु किमपि केन. मे वंस्त्रामं नाघटा

८०

ग वृ प्र नेरतिखुत्पत्या नित्यस्त्रीत्वालाभार्थं तदुपादानात्. तेन ग्रामण्ये सेनान्ये स्त्रियै इत्यत्र न भवति। ग्राममंपि नो
७८ वनयतीति हि क्रियाशब्दाद्धेतौ लिंगत्रयसाधारणोऽत एव. आध्येआह्व लोइतिभाष्योदाहरणं चिंत्य
मिति कैयटः आध्यानकर्तृत्वस्यापि लिंगत्रयसाधारणत्वात्. स्यादेतत्। आपमंतान्ही र्घस्या इति वि
ग्रहे गत्वा परस्य नित्यस्त्रीत्वात्. नदीत्वमस्त्य. प्रथमलिंगग्रहणं चेतिवत्समानत्वात्. आतिलस्ये
ग्रामण्योयेतिवत्. तत्कुतो भाष्यस्य चिंत्येनेति चेत्. न. न ह्यासनिमाणो दुर्लभत्वात्. गतिकारकपूर्व
स्येष्यतेऽस्यत्र हि गतिसाहचर्यात्कारकपूर्वस्यापि नित्यसमासस्य ग्रहणं गतिसमासस्य प्रतिप
या दोऽस्त्येव गम्यते. तेन दुर्धियः शुष्कपिष्टपलायमानस्येत्यादावनित्यसमासत्वान्न यण् इति पु
रुषोत्तमप्रभृतयः। अत एव कन्मेजन्तः इति सूत्रे मानः समस्यग्रहणं इति मंत्रेव्याख्यायां सुधियः इति
कैयटेनाप्युक्तं. अहरविप्रकर्षेण वकृत्त्रीहि गतोऽसमर्थ केथनं. व्याख्येयमंचेतु दृष्टं ध्यायती
ति विग्रहे नित्यसमास एव बोध्यः। ततो यणादुपोना शब्दाशब्दप्रध्यो। प्रति एपादादिसूत्रस्थवा
नि कृ न गत्व सूत्रे व्याख्ये तदा निकव्याख्यावमरे दृष्टं ध्यायतीति विग्रहश्च आतश्चोपसर्गे इति क ए॰प॰ ७८
प्रत्यय इति कैयटहरदत्तादिभिरुक्तं न चिंत्यं. अतएव रितानुरोधेन अर्थानुरोधेन च व्यवस्थादिव

× निर्भियः ६

द्वत्रुद्रुतयाणादेशानुकारणानयेष्वार्त्तिकस्यप्रत्याख्येयत्वात्‌। सर्वस्य द्वन्द्वे अह इति रूपद्वयं नोस्मा
न्मावधीरिति हि तनीप्रचरणास्थेन महावग्रः अमेरतिरित्यनुवर्त्तमाने हन्ते रं इचेत्यं हादेशो तिष्य
प्रत्ययः। अंहतिश्च इत्यस्यप्रावेश नं निवर्पणाम प्रवर्त्तनमंहतिरित्यमरकोशादिवलाद्दानेरूढोतु अंह
षप्रयुक्तमापिचारिकाद्येगम्भृतमेवतद्दिहयात्यो उणादीनामव्युत्पत्तिपक्षाश्रयणादैतोदान्तता।
वहिवस्य विप्यश्चिदिति विहूरणानुवृत्तेरिति वनत्वेन एतेनमानोगर्व इति यावद्दुणाणाञ्चपि प्रत्य
का। पदहूयत्वस्याध्याप्यकर्त्तप्रदायमिहुप्रात वाक्यशेषानुगुणायाचनस्मादाध्येब्राह्मण इति
भाष्योदाहरणं विस्पमिति स्थितं। भाक्ततु भस्मप्रेयेन्त्र प्रमासा। तत्रैवगतिकारकपूर्वस्यैवेति
ति पणन्मवन्तेन इति वदतां श्रीपतिरन्ताहीनाम पिमते कैयटलोके विंत्पं इदमेव। वक्ष्यतलक्षआ
ध्यानमाधीरितिसुत्याघयणगुणिनोरभेदविवक्षयैकप्रयोगोऽयमिति विंत्पो द्वारो वधेयः॥ हर
दन्नस्त्वाह। नित्यपक्षी त्वंनाम नलिंगांतरान्नभिधायकत्वं। किं तु शब्दान्तरसमभिव्याहारं विनैव
स्त्रियां वर्त्तमानत्वं नतः। ब्रवि स्वार्थो प्येवं कथं दारियाम एवे वल घेड्त्या विप्रसुदारा स्त्रिय इति
चेत् शृणु। क्रियाशब्दत्वेपि नयोः पुंसि मुख्याहृत्तिः पुंसामेव व्यवमोक्षगिंकोधर्मः यन्नामन

श॰दृ॰प्र॰ पत्नेत्वेल पत्नत्वंवा ॥ आधारानंतु स्त्रीपुंसमसाधारणमेवेतिचेत्प्रमं॰ तस्मायुक्तमेवेदं भाष्यमिति ॥ अत्रवार्ति
७८ कं प्रथमलिंगग्रहणांच ॥ अयोजनं किंपृत्तु प्रसमासाः अस्यार्थः यः पूर्वसमात्स्वः पश्चादुपसर्जनतया
लिंगांतराविशिष्टं स्यात् तमाहतस्य नदीसंज्ञा न कप्या ॥ किं पिकुमारीमिछतिकुमारीयतितः किंप्॰ अ
त्रोपधलोपो कोत्तुषस्यात्तिवत्व निषेधान्न प्राप्ताः ग्रहाकुमार्यतीतिकुमारी आचारक्किवंतात्क
र्तरिक्किप् कुमारीब्राह्मणाः यंतत्वात् लोपः ॥ तस्मै कुमार्ये ब्राह्मणाय स्यादेतत् । इह कस्यचित्किपोः
प्रकृतिभूतस्य ङीवंतस्यापि तिलहीत्वेउत्ते भवत् पुल्लिंगात्तक्यच् किपोः निवृत्तित्रिलिंगं नसमाना
क्वात्वादि तिचेत् न अर्थभेदेन शब्दभेदाश्रयणात् तु उप्र प्रथमोदाहृतस्येत्यत्रूपात्ति कुमारीमिछ
न् कुमारीवाचूनब्राह्मणाः कुमारीयतेत्वात्स्वलोपः कुमार्यै कुमार्यः ॥ न च हस्य चिस्तु धात्विति य
ऽ प्रसंगः ॥ एरनेकाचः इति यणावाधितत्वात् अत एव अभिशासिनु कुमार्यै कुमार्यः । अध्यं प्रध्यइति
वत् न च गतिकारकपूर्वेस्यैवेति निषेधः शंक्यः ॥ नास्ति पूर्वस्य नैत्यर्थात् विशिष्टाभावस्यापूर्वे
विपत्त्वात्तड॰ वि॰ कुमार्यै कुमार्याः कुमारीणां कुमार्यां ब्राह्मणी हे कुमारि ब्राह्मणीत्वात् दिः पत्न्याः एप ७९
देस्कु संयोगपूर्वकत्वादियह ॥ पतिवेदो पतियइत्यादिशीर्षप्राय तपुल्लिंगात्तक्यकङ्गोनिष्पन्न

स्यस्त्र अग्रे नत्वात् ह्रस्वलोपो न। कुमाराः। हे कुमारि। अनदीत्वाद्ध्रस्वो न। कुमार्यै। कुमार्याः। कुमार्योर्ब्राह्मणानां
कुमार्योर्ब्राह्मणीरित्यादि। कुमारमात्मन इच्छन्ती तिब्राह्मणी कुमारीत्यत्र विकेयट मते नित्य स्त्रीत्वा
भावात्तु वक्ष्यमाणो ह्रस्वत्वमते तु लक्ष्मीवत्। अपि शब्दमित्र पत्र विशेषः श्व कु नमनु ससमः। लुप्त तुष्ट
इति लुप्। स्यात्। कुर्योर्ब्राह्मणाय। पद्यपुत्रपुस्त्व ज्ञात्वा स्त्रीत्वमस्ति तथापि स्वाश्रय पस पुंस्त्वस्यापि विद्य
मानत्वात्स्त्रीत्वं नास्तीति विकेयट ह्रादयनारूयः। तन्निर्दिष्टं चाः पक्षे स्यादोशमान त्वा पत्ते। तस्मात्तुर्वेते।
खरकुटीवंचादित्रिवेदं शास्त्रीयमस्त्रीत्वविशिष्ट एव लौकिकः। पुमानप्यभिधीयत रत्येव तन्त्रा। एवं च
लुप। अयोनत्वेन कथं गणानेत्त्य विचिंत्यं। समासेऽन्यत लक्ष्मीः। वह्वयः प्रश्नी। इयमश्रोतिकष्ट्रिप्रेधः
र्यपमोवर्जश्रीहंहैनेसुपमर्जन ह्रस्वो नाभ्य पनापिलं कुड्रो हूसः। डिः। ह्रश्च आङागमादिकं च नदीसज्ञा
कार्यं वोध्यं। अत्र वयस्त्रीविषयत्वान्निर्द्ध। समासे तावत्स्वयमेवावह्व्यादिशद्वः स्त्रियामेव वर्त्तत इति
तदानीमेव मंता पद्मेसमुदायस्य न घटनात्कार्यविहिः तस्तं समसंत्तेतिपक्षे तु अगाधि कृत एतस्मै
वत उनाय हस्य चेति वचनात्। वस्कन लक्ष्वचनस्य प्राग्वहूषितत्वान्न च नत्वे नेवस्ति ह्रिवौध्यां। अ
तितंत्रीवंधुरित्यत्रापि नदी वंधुनीति पूर्वपदां तोदात्तत्वं सिध्यति। पूर्वपदस्य नद्या विशेषणात्।

श॰ वृ॰ प्र॰ क्विवृत्त्योरपि श्रूयमाणत्वात् क्विबादेः प्रागेव घ्यन्तसंज्ञा संज्ञा बहिरङ्गा लिङ्गान्तरयोगे न निवर्तते · तच्च क्विप्
केऽकृते · अकृतव्यूहास्त्वप्पाणिनीयता याश्च पूर्वस्मिन्निति सूत्रे प्रावर्तितत्वात् · स्यादेतत् · इयुङ् · वङ् ·
स्थानप्रतिषेधे यण्णस्थानेऽप्रतिषेधप्रसंगो भूय इयङ् · उवङ् · स्थानत्वात् · यथाद्यवयवस्य ह्रीविष
यत्वात्समुदायस्य नदीसंज्ञेत्युक्तं तथावयवस्य यङ् · वङ् · स्थानत्वात्समुदायस्य यणः स्थानस्यापि प्रति
षेधः स्यात् · यथा · श्रियै · आध्यै · प्रत्रास्त्रियै । इयङ् · वङ् · स्थानमेवागमादिस्थिप्पतौ । अंगाधिकारेण प्रोविधानात् ।
तेन यस्यांगस्येयङ्वङौ निर्वर्तितेन तस्य नदीसंज्ञानिषेधः आध्यै इत्यत्र तु अवयवस्यांगत्वं नास्तीत्यंग
स्यत्त्व एरनेकाच इति यणो विधानादियङ् · वङ् · स्थानता नास्तीति निषेधाभावः । एतदर्थमेव च न च स्या
नग्रहणं । इयङुवङोर्यत्राप्तिस्तत्रोपनिषेधो यथा स्यात् · यदा त्वपवादेन बाधस्तदाभावादिति ·
एवं हि · तिद्धस्वस्थे सत्याविषयगस्यादेः प्रात्सौपि विधिरंगस्येव स्यात्वे भवति नावयवस्य · शकंधी ·
अतिशक्रत्स्यैवाहणाय श्रियै अतिश्रियै वाहणायाई इत्यत्र स्यादेव · अतिश्रियै अतिश्रियै ब्राह्मणाय
इति स्थितं भाष्ये · न चेह नित्यस्त्रीवृत्तं नास्तीति वाच्यं । हारदत्तमतेनैतेनान्वात् · केचित्तु अत्र तिरूप्य एव
त्यस्त्रीग्रहणमात्रमनुवर्त्ततेन तथा प्रयोगहतां । एवं च बहुधीशब्देपि स्वपक्षयं निर्विवादं स्तुधियस्य पु ८०

ङितिशक्तिपात्रसामादिक्ये च अतिलक्ष्म्यामिति बोध्यमतिलक्ष्मी हू हूभ्यां प्राप्नोति क्विरध्वेवं तथा स्वयंभूः पुंव
दित्यपि प्रसमाहृएवा॥ स्याडिनमानि घेः शांविशुमानिस्यप्राप्तिरर्थं तर्हिगतयानदी संज्ञाप्राप्तादि तिलक्ष्मा
स्रोयथा॥ प्रत्यं॥ मत्स्यामपि तस्यां नकाङितिरूपे दोषः॥ न च संबुद्धिह्रस्वादिग्रसंगः॥ ह्रस्वादेशेन नद्याश्रप
हारात्॥ वर्णाश्रयत्वनदीत्वात् स्यात् अप्रत्ययत्वेन त्वमस्यशब्दस्या श्रयत्वमात्रेण बोध्यम्॥ पर्याश्रयाधिकारात्तथा श्र
विवक्षितत्वात्॥ नदंतस्य नदी संज्ञेति पक्षेपि एकदेशविकारानन्यत्वेन सर्वदेशस्येव वरूत्रत्वा
त्॥ न च व्यवस्थानिवद्भावोत्ववधित्वात् शपयेत्यत्र त्रेः भावार्थविशिष्टगतं याविस्त्रीलाश्रयत्वनिषेधस्य
क्षितत्वातिमत्वात्तस्यापि दिलाविधिको शांश्चेनि घेः शांवद्र द्वावस्येत्यत्र ऊठ इति हस्वश्चेति विकल्पो भय
त्येवेति दिक्॥ नेयङुवङ्स्थानावस्त्री॥ इयङुवङोः स्थितिः स्थानं निरपवादा प्रमक्तियत्र नावीह
नोनदीसंज्ञा नस्तः श्रीशब्दं विनाहे श्रीः हे भ्रूः अस्त्रीति किं हे स्त्रि कुथं तर्हि विमाननान्यपुभ्रुकन्तः पित
गृहे इति कालिदासः अस्मापितः कारि हेमभ्रु इति भट्टिश्च एकवंशप्रभवभ्रुवंस्थिति श्रीहर्षश्च प्रमा
द एवायमिति हरदत्तः॥ समासे नपुंसकमिति वाक्यार्थे विग्रहे वा यं के विग्रहतदोदावचने नम्रकृत
इगनिसमिति परिभाषाज्ञापनमाश्रित्यानित्योयं प्रति बेध इति समादधुः किं त्वेनं पम्रकत्वप्रमाते



श.र.प्र. ष्टुः किंत्वेतत्सकलप्रमादे षुष्ठवर्यं तदेव वचनप्रत्याख्यानपरभाष्यादिविरुद्धं चात्र न्येतवामी
८१ स्यतोवा प्रत्याहारग्रहणस्य सिद्धं हाव लोकितन्यायेनानुवृत्तस्यस्य वर्णस्थितविभाषापरत्वेनेष्टसिद्धिमाह। तदपि
नसिद्धं हावलोकितन्यायस्येष्टाभिमतत्वेनज्ययहणस्यवामीत्सुत्रं प्रत्ययस्य च वेयर्थ्यापत्तेः। पदकृत्ते ऽर्थ
तृतीयोः प्रशब्दादपाति जाने शिष्टमूढिः समासेन्वयप्रजेनञ्चक्षत्व केवलकृतेऽनङ्। नङस्मृतिः। नस्य समुदाय
प्रकृत्वात्रो नङ्ः स्थानन्वमिति॥ तदतिस्थवीयः। अत्यय स्य मकृत नयानिष्टमाणकत्वात्॥ तत्स्था
निकस्यैकादेशस्यातनवज्ञावेतत्र शङ्खक्यवनाया। अथनपायात। अंगाधिकारेतदुन्नापरग्रह
णस्यनिर्विवादतया समुदायभक्तेः पूर्वद्विः प्रत्ययेषु स्तुभ्यवादित्यादि स्यपाणां सर्वेषां समं तन्त्वाद्येति
दिक्॥॥ वामि॥ ॥इयङ्ः वुङ्ः स्थानावानद्दीसंज्ञौस्तः स्त्रियामामिश्रीणां॥ श्रियां॥ भ्रूणां॥ भ्रुवा
॥ हितीये कवचनं तनेहृस्वत्वेष्वन्यने। नत्रनदीकार्याभावात्। अत्रीस्येवं स्त्रीणां। इहवा विकल्प
श्रेस्येवकुतोनङ्कृतं। एवं हिकिनीतिनकर्तव्यमिति चिंत्यं। वस्तुतस्तु सन्निपातपरिभाषयाय
णामिति तु स्मस्यादनन्त्रामी तुकः। परिभाषा वेयमनेनेव ज्ञाप्यतइतिध्येयं॥॥ डिति ह्रस्वश्च॥॥इ
यङ्ः वङ्ः स्थानौह्रस्वौ च यूस्त्र्याख्यौ नदीसंज्ञौ वास्तः स्त्रियां ङिति परे। श्रियै॥ श्रियै। श्रुवे। ध्रुवे। कृत्येकृतयो॥ एम
८१

स्त्रियै भ्रुवै· ध्वे इत्येकृत्यैकृतयोर्घयेर्धेनवे । अस्त्रीलेवा स्त्रियै । स्त्रीलिंगा विनिकिं अग्रये । वा यदो रह
ग्रहणम लिंग ग्रहणं नास्ति । तेन तिङ्क्षौ शौ दिहेरिवा हिस्तुरुं स्त्रियमतिक्रान्तो तिस्त्रिः स्त्रियमतिक्रान्तविशे
षः । अतिस्त्रियौ । स्त्रियाः इतीयङ् · अयं गोणत्वेपि भवति · किंतु गुणानाभावोत्व तुङ्गिः परत्वान्ते
पि बाधते क्ली वेतु माव स्त्रीशब्दस्येयङ्गि · स्त्रवधार्यते नो न निवृत्ते तिगुणः । अतिस्त्रयः । वामशसो । अ
तिस्त्रियं अतिस्त्रिं । अतिस्त्रियौ । अतिस्त्रियः अतिस्त्रीन् । आङो ना स्त्रियां । अतिस्त्रिणा । अतिस्त्रि
ष्यां । घेर्ङिति गुणः अतिस्त्रये । अतिस्त्रेः । अतिस्त्रियोः ॥ ह्रस्वनद्यापः इति नुट् । अतिस्त्रीणां । अ
च्चघेः अतिस्त्रौ । संग्रहश्च · औकारं आपि निवृत्य स्यादेमशसोस्तु विभाषयाद्युदेशोऽविनाम्निति ।
स्त्रियाः स्याडन्यसतेते । एवं क्लीवेतु मारयङ्बाधते · तेनाति स्त्रि · अतिस्त्रिणी इत्यादि वारिवत् ।
स्त्रियोस्तु ङि · तिङ्क्ष्वथ तिङ्क्ष्वान्त्वयपुक्तो नदीसंज्ञा विकल्पः । अस्त्री तिनः इयङ् · उवङ् · स्थाना
वित्वसे नुषिधेध नतस्य वहुत्वे बातु हत्वः न वेहा च्छस्पो भयविशेषणतात्प्रमाणाभावानि ।
तेनाति । स्त्रियै · अतिस्त्रिये । अतिस्त्रितिबा धिता इयुङ् स्थानिनिति उत्तमा । अतिस्त्रियां । पक्षे · अघेः
अतिस्त्रौ ॥ शेषांद्यप्रसवि ॥ ह्रस्वो यो यतहेतक्षवि विभित्र मनदीसंज्ञ तपि संज्ञा स्यात · हरये । भानवे ।

शब्दप्र॰
८२

ङस्यौ कि॥ आमसर्पे॥ वलये॰ इ कि॥ मात्रेऽस्मविकि॥ सम्बोधे॰ शेष॰ किं मत्यै॰ शो प ग्रहणं च ध्रौमिति नदी
पं ज्ञा सूत्रएवोक्तं॥ समासेतु स्त्रम वेगागच्छतीत्यादौ द्विसंज्ञाभवत्येवासमुदायस्य स विशब्दात् द्वि
त्रत्वात्॥ न हं तन्न ग्रहणं तु नास्ति॰ विशेष्य सं वंधाभावात्॥ यत्तु ग्रहणं वर्तत्यादि हा स्त्रीतो प्रत्यस्तु
त्यस्यात्र वेचकैः यदेन॥ न सूत्र वोपर विरुद्ध मिति येन विधिरिति सूत्रेसुत्यादिनं॥ न चैवं यस्येति चे
ति सूत्रे इ वर्णौ स्यइति स वीस्तु ग्रहणं न युज्यते॰ स विशब्दात्स्त्यपि ष्टीति भाष्याये ति त्रि
ष्टि मति लोपे स वर्णे दीर्घे च विशेषाभावात्॥ यत्तु न च ग्रह्णा सुक्तेऽस्मति लोपे गति स खेराग च्छ
तीत्यत्र सवर्णं दीर्घस्य पूर्वं प्रत्पं न च ज्ञावात्स खाति द्विसंज्ञा प्रतिषेधः स्यादिति॰ तन्न॥ समस्य
न वज्ञावेस मस्त स्य सावि शब्दा द्व्यत्वानपायात्॥ अत्रोच्यते॥ सखीमत्यौ सख्ये इत्यावावन
ङः॥ ति वे मा भूत्तामि ति इल्लोप एव तत्प्र॰ नवा सिद्धान्ते पिञातिपदिक ग्रहणे लिंगविशिष्ट
ग्रहणा द्दोष तादवस्थ्यं॥ विभक्तौ लिंग विशिष्टा ग्रहणात्॰ एतेन रकार लोपस्य तद्धिते एवोक्त सा
हा णोन त्वीतिपान तु ति वदन्न हारतो पास्त॰॥ पतिः समासएव॥ पतिशब्दः समास एव घिसं राम
ज्ञः स्यात्॥ भूपतये॥ नेह॥ पत्या॰ पत्ये॥ विपरीत नियमं वारयितुमेव कारः॰ इदमुत्तिना॰ स्यादे ८२

स्तेनतारीषोऽप्यसवित्रिपत्न्य इत्येवाक्य· समस्तस्य तु पूर्वोक्तरीत्यासिद्धं नवीनास्त्वत्रैसमस्तुरपि
संबंधापत्तिः। बाधकाभावात्। इष्टरूपस्य नावनापि सिद्धेः। द्वितीयपक्षे त्वसाधोरपि ब
हुव्रीहिप्राप्ते निसमानाधिकरण्यान्वयात्तन्नैव सुत्तरस्त्वत्रैव षष्ठीयुक्तेत्यहोऽप्यर्थः स्यादितिवाग्रहद्य
पत्नेः एवमेव बहिष्काग्रामपि पाठैः इत्यत्रीग्रहणं नित्यमंत्रइत्यादीति वश्तव्याख्यानानि· संबुद्धौ
शाकल्यस्यैत्यत्रानार्षे ग्रहणमप्येवं। मत्सर्वथापवित्रिं ग्रहेणग्रहमखापाविस्तत्र हूर्वेनियाना
निधमस्तथा पतिगृहे इत्यत्रमाभूतां इहहिषित्वा स्वर्वेनिपातएवात ऊर्ध्वस्य· तु स्थावि
ध्यायेनहित्वादाहउ पतिनेत्यादिवोध्यं। अथ कथं मलिनावनरंडेत्यन· पतिनानीयमाना
याः पुरः पुत्रकोन दृश्यति· नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतावित्यादि। अत्र हरदत्तः छंदोवद्दृषयः
कुर्वंतीति· अस्याप्यमाशयः असाधवएवैते· त्रिशंक्वाद्यध्यायप्यजनादिवत्तेषोमाहात्म्यशालिभाप्सनी
नांअसाधु श्रयोगोपिनाभावबाधकः। अस्मदादीनांतु तस्मृतिपुराणाद्यध्ययनविधिबलादेवन हंत
गतित्यागेनु बाधकनत्याचवातं म्प्रोग्रहणं प्रयुंजानास्मदादीदयः अस्यवर्षस्येवेति· नदीसंज्ञासूत्रेभा
ष्यकैयटयोराविच्छिन्नमित्वं। प्रद्वासवित्याख्यातःपतिः पतिरित्याख्यातः पतिः। ते न· सवितापतिना

श॰रू॰प्र॰ आख्यानरूपं नान्तर्णाणिश्रुच इतिष्यैणादिकड्प्रत्ययः त्ताङ्गाणि कत्वाध्वौ तयोर्दि संज्ञापर्युदासे यह
८३ नास्तीति हिक॰ एतेनानुतस्य सखेतिक्लृप्तः कुमस्य सविशङ्गु नरत्सपि चाख्याता ते। कथं वचोवाचस्प
८३ तेरपीति माघः। नहयंप्रमाधः। अनुविधाय कादर्शनादिति। मत्तु रूषे कृतीति वृद्धेन ग्रहणादलुक्॥
एतेन दिवस्पतिर्वास्तोष्पतीत्याख्यातो। ब्रह्माः यतीत्यादिनाम स्यो। पितृन त्रवेद पीत्यतु च नेयंति
प्रियः पतिरित्यादि सिद्धये॥ तन्मते पारस्करादित्वात्सुट् केचित्तु द्यावापृथिवी शुनासीरा मरुत्वदु
ग्री षोम वास्तोष्पति गृहमेधाच्छ चेति सामान्यापेक्षज्ञापकात् षष्ठ्या अलुक्। कस्कादित्वात्सत्वं।
इत्याः परस्य तु षत्वमित्याहुः। पदकारास्तु वाचस्पति विश्वकर्माणं। वास्तोष्पते प्रतीत्या। दोषश्च
रूपदस्म वधीयतो। षष्ठीयुक्तश्छन्दसि वा॥ षष्ठ्यंतेन युक्तः पतिशब्दश्छन्दसि विसंज्ञो वा स्यात्॥
क्षेत्रस्यपतिना वयं। इहयोगो विभज्यते॰ षष्ठीयुक्तश्छन्दसीति॰ ततो वा॰ छन्दसीत्येव। सर्वे विधय
श्छन्दसि विकल्प्यन्ते इत्यर्थः। बहुलं छन्दसीत्यादिकमस्यैव प्रपञ्चः॥ ह्रस्वं लघु॥ ह्रस्वं लघुसंज्ञं
स्यात्॰ लघुपधगुणाः चेतैति॰ नचह्रस्वप्रदेशेष्वपि लघुसंज्ञयैव व्यवहारः सुकरः सर्वत्रापि राम
स्यादीर्घ खावानो तद्धितउनिषन्नायामिति प्रसंगात् गुरुसंज्ञया तत्र लघुसंज्ञाया बाधात्॰ तस्मादि ८३

कसंज्ञाधिकाराद् हि ह्रस्वसंज्ञा प्राप्नाय मेघस्य गोवत्कृते एष एवं तर्हि दीर्घप्लुतसंज्ञाप्यांकस्वसंज्ञायाः
समावेशमाशंक्य एकसंज्ञाधिकारे ऽयं योगः कृतः इति भाष्यविवरणे । गुरुसंज्ञया लघुसंज्ञाया
इव गुरुलघुसंज्ञाप्यांकस्वसंज्ञायाबाधप्रसंगात्· नच निरवकाशता· लघुसंज्ञा ह्रस्वस्य उपायता मा
त्रेणासार्थक्यात्· यथापरं संडुसं इभवतीतिव्याख्यायां परसंज्ञाप्रसंगात्· नच निरवकाशता· ल
घुसंज्ञा ह्रस्वस्योपायतामात्रेणापसार्थक्यात्· यथापि इसंइ वनीतिव्याख्यायां परसंज्ञायाः समा। चका
रादिनासमावेशः कर्तव्य इत्याशयः एतदपि श्लोपादेवचातत्र पक्षांतरोपेण्णकाः नीति दिक्।।
संयोगे गुरु ।। ह्रस्वं गुरुसंज्ञं स्यात् संयोगे परे। शिक्षा। गुरोश्च हलः इत्यकारप्रत्ययः।। दीर्घं च।। दीर्घं गुरुसंज्ञं
स्यात्· ईहां चक्रे।। यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं।। प्रत्ययो यस्माद्विहितस्तदादिशब्दः प्रत्यये पर
गसंज्ञः स्यात्। एमिता· विधिरिति किं। स्त्री इयती· न वेह धातुपः स्त्रीशब्दादिविधानेऽपि सोऽविधीरसिवेति
वाच्यं· सन्निधानवनेन यस्माद्यः प्रत्ययो विहितस्तस्मिन्नेवांगमितिव्याख्यानात्· तदादि किं वधयानि
वदिष्याणि।। अतो दीर्घो यञि इति दीर्घः न चायमारंभसामर्थ्यादेव भविष्यतीति वाच्यं पयामो· वय
गतौ· आभ्यां घञ्· लुकि पायामि पापावः पापामः वावा नि वावावः वावामः इत्यादौ चरितार्थत्वा

शब्दृ॰प्र॰ न॰ प्रत्यये किं। प्रत्ययविधिरित्यस्य नतोऽत्र धिकस्य वामाभूत॰ एवं हि वृक्षेत्सुर इत्यस्य परिनिष्पन्नत्वं व
८४ लभ्येत॰ तथा च अवः परस्मिन्निति स्थानिवत्त्वाभावाद् इकारस्य संप्रसारणाऽप्रसंगः॥ न च प्रथमसूत्रे णास्थानिव
द्भावः। अविधित्वात्॰ अत एव हि मत्यपि प्रथमलिंगग्रहणोनिष्कोशांख्यायोनदीकार्थेनेत्युक्तं॥ इह प्र
कृत्यादिप्रत्यये गमित्येव लाघवाद्वक्तुं युक्तं। प्रकृतिमात्रस्य तच्च्युपदेशिकद्वा वा स्मिद्धं। कतकिारकः॥
इह योगो विभज्यते॰ यस्मात्प्रत्ययविधिस्तदादि प्रत्यये इति॰ परिभाषेयं॥ प्रत्यये गृह्यमाणे यस्मात्स विधि
स्तदादि इत्यर्थः तेन निस्पादि ईप्सादौ यत्र प्रत्ययाः सन्नप्यानिर्दिश्यते तत्र न तदादग्रहणं। तेन देव
दत्तो गार्ग्य इति संघातस्याग्निल्वरोनभवति॰ सुपश्चात्मनः क्यजित्यत्रापि नेन तदादिनियमः॥ तत्र सुपा
कर्मणास्तदादेर्वा विशेषणात्त्वं तत्त्वविधिः नेनम हांतपुत्र इत्यादावति प्रसंगोन॰ सति हि वाक्यात्क्यविप
हल्ड्यी यती ति स्यात्॰ न थाद्देवदत्तोश्छीकीयतीति संघातस्य धातु संज्ञान॰ देवदत्तो गार्ग्य इति संघातस्य
प्रातिपदिक संज्ञानस्यान्न देवदत्तो गार्ग्यायण इति संघातात्प्रज्ञेति दिकस्यापवादः कृद्ग्रहणमति
कारकपूर्वस्यापि ग्रहणमिति॰ इहचणनिरनंतरइत्यनंतरग्रहणं ज्ञापकं॥ न क्विन्प्रत्ययस्य तत्शाद्वे जदर एप
व्यवहितस्यापि शब्दस्य प्रकृतिस्वरनिष्ठस्यार्थे॰ न च परत्वान्नितिर्गतोविति निघातेनेकते उदात्तग्रहणं॥ ८३
८४

तुह्रस्वाविधीयमानः पूर्वपदप्रकृतिस्वरेण न भविष्यतीति वाच्ये । अपासा वित्यधिकारान्या दासैनित्यं
तायवत्तेः । तसादिनियमेतङ्कतशब्दस्यकृान्तत्वेषु हृतशब्दस्यकृान्तत्वात्प्राप्तिरेवनेतिकिमनेनत
य ह्णोन । प्रयोजनं तु समासत द्धितस्वरः । तथाहि । अवतप्तेनकुलस्थितंत इत्यत्र कृनेत्यनुवर्त
मानेऽस्मिन्नेवइतिसमासः । तत्तु रूपवेकृतीत्यलुक् ॥ प्रांकृतिनामित्यत्र अणितुगा इति प्रो प्राप्तेगोत्रस्य ·
अत एवाहितहृदयगर्गोप्रीषर्थपत्तनिष्पावस्कोशीत्यत्रकर्मण्यतिहारेणावाक्षियामिति णावः न
तोणावः स्त्रियामित्यज्ञ । नकर्मव्यतिहारेत्यैजनागमनिषेधः । इतरेतरागतइत्यत्र यथाथादिस्वरेणां
तोदात्तत्वं । नन्वपरिभाषां विनापि समासस्यान्तोदात्तो भविष्यतीति चेत्रमैवं । आगम्यतेस्मेति
हि कर्मणि क्तः । तथा च समासस्वरं बाधित्वा गतिरनन्तरइति मध्योदात्तं स्यात् । मत्या तु परिभाषा
यां यथाथ इतित्यनेन कृत्स्वरापवादगतिस्वरं बाधित्वा परत्वादन्तोदात्तत्वं भवति । नन्वथाथा
दिस्वरस्यापि अपवादो गतिस्वरः । सत्यं । गतेरनन्तरस्य कृान्तस्य पूर्वपदं तो दात्तत्वं तस्यैवासौ च पवादः
। कारकादुत्तरस्य तु थाथादिस्वर एव भवतीति वक्ष्यते । नन्वेवं गतिस्वरेण घसा नत्र आगतशब्दः
। ततोदात्तावप्यस्तोकांतिकेति समासः पंचम्याः स्तोकादिभ्य इत्यलुक् ॥ ततः सतिशिष्टत्वात्स

शब्दे॰ त्वात्समासांतोदात्त एव भविष्यति। मत्वं॥ अन्यार्थं कृतया परिभाषया कृदुत्तरपदप्रकृतिस्वरेणाद्युदा
८४ त्ते आगतशब्दे प्राप्ते सगतेरिति कांतत्वात्समासांतोदात्त एव भविष्यति मत्वं। अन्यार्थं कृतया परिभा
षया घुदत्तरपदप्रकृतिस्वरेणाद्युदात्ते आगतशब्दे प्राप्ते सगतेरिति कांतत्वात्स्थानांतरंगत्वान्न ह
तिस्वरस्य बाधकस्यापि बाधनेन यथाहि स्वरो भवतीत्येवाभिप्रेतेन न तु स्वर एवानयथाभिद्धेयपरिभाषोद्द
हृता। एषा च परिभाषा प्रातिपदिकसंज्ञायां न प्रवर्तते। मध्योपवादस्यायेन कृद्ग्रहणस्याप्रत्ययद इति
शाकलनिषेधाच्चशब्दस्य स्मृपदंशादेनत्सार्थं क्यप्रसंभवात् एतच्च पुंयोगादाख्यायामिति सूत्रे भाष्ये
कैयटयोः स्पष्टमिति दिक्॥ ष्यङः संप्रसारणामिति सूत्रे भाष्ये तदादिनियमस्यापवादात् पठितं॥
स्त्रीप्रत्यये चानुपसर्जने न तदादिनियमो नेति। एतच्च वावनिकमेवेति सर्वादिसूत्रे व्याख्यातं। यद्वाऽ
हन्नेयङुः। पङः। इत्यानादिप्यतो ग्रीत्यनुवर्त्तते। तद्रूपघ्यपितत्त्वस्वरूपपदार्थकेन तथा पीदार्थपरं संपद्य
ते। प्रत्ययग्रहणे तदाविधान्यं। स्त्रीचेत्वाभिधीयते इत्यर्थः। तेन स्त्रीप्रत्यये तदादिनियमो नास्ती
तिफलितं। न चैवमतिकारीषगंध्यापुत्रइत्यत्र संप्रसारणाप्रसंगः। त्रुस्त्रीत्यनेन प्रधानस्त्रियामेव राम
त्त्वप्रतिषेधात्तगौणात्पुस्वयोरितिन्यायान्नः। तेन पावानतशब्दः स्त्रियां प्राधान्येनाहृतावानस्त्रीप्र ८४

मर्थात॰ न त्वनन्तोमिकोपीति चिन्त्यं । सुप्तिङन्तं पदं । सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ब्राह्मणाः अधु॰
श्च॰ तत्र ग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे न तदन्तग्रहणं नास्तीति ज्ञापनार्थं । गौरब्राह्मणितरा
व संज्ञायां तदन्तग्रहणं हस्तिहस्तिनीति गौरीशाद्रस्व पुंवत्कर्मधारयेति पुंवद्भावे बाधित्वा पुंवद्भावाद्ध्रस्व
स्वं त्वं विधा दिकेष्विति ह्रस्वः स्यात॰ पठितरेति वत्सब्राह्मणीशद्रस्य वहस्वेन स्यात॰ कथं तर्हि ज्ञा
तिपदिकसंज्ञायां कृत्तद्धितशब्दात् प्रातिपदिकं तत्प्रहणमिति चेत्॰ अत्र भाष्यकाराः अर्थवद्ग्रहणं तत्रा
नुवर्तते॰ तस्मात् समर्थात् तदन्तग्रहणमिति॰ स्यादेतत्॰ प्रत्ययश्चेवज्ञा पारमार्थिकी विवक्ष्यते॰ न हि
मापदस्य॰ वाक्यस्य वास्ति॰ न तु कृत्तद्धितान्तस्य । तथा वार्थवत्सूत्रे वार्तिकं ॥ अर्थवत्तानोपपद्यते
केवलेनावचनात् इति॰ अथ यदि इत्यत्र प्रत्ययमतिरेकाभ्यामिति॰ न त्वत्पोत्तरवार्तिकानुरोधेन प्रक्रिया
दशायां कल्पितान्तावेवक्ष्यते तर्हि कृत्तद्धितयोः र्पुमात्मीति चेत्॰ सत्यं । अत एवार्थवद्ग्रहणमा
मर्थं मुक्त्वा प्रत्ययातनेन त्यकार्थीभूते न प्रतीयमानोर्थ इह गृह्यते॰ न समस्तो लौकिकार्थं प्रति प्रमा
सज्ञत्रत्वात् ॥ न तु पः शाखुपान यातमेवग्रहणात्॰ अत एव यत उपादानं सार्थकं पू
र्वसूत्रे धातोरिति पर्युदासवलेनापि न लाभसंभवात् ॥ नक्येः । कचित्कश्चिदिति क्या विवर्त्तिनमेव

श॰रु॰श॰ नमेवपरसंज्ञंस्यात्॥ कथंचगानीयतिक्यङ्॰॥ राजायते॰ काषधर्म्मायति॰ चर्मायते॥ इहैवस्यामा
८५ म्य॰ग्रहणार्थः॥ काषः॰ ककारइति वरतो घ्रतिकारस्यनतेनेदमुदाहृतं॥ भाष्येतुक्यषः क
कारस्य इत्संज्ञाभावान्नत्वक्यचकाङ्गे रेवहय्हतां चमोयतीतिरूपं चासाधु॥ क्यङ्॰ न तयानिस्य
मात्मनेपदास्युपगमात्॥ तथा चव स्पते॥ ओहिस्रङ्नथः कायचनं भ्रशादिषिनराणीति
एतद्धत्वतीय एवस्फुटीकरिष्यामः॥ नान्नमेवेतिकिं॥ वाच्यति॥ स्रुच्यति॰ नपस्यति॰ नतुक्यं
एवनांतामितिविपरीतो नियमः कुतो नेतिचेन्न॰ नाङ्गिसंबुद्धयोरितिज्ञापकात्॰ नलोपः
प्रातिपदिकांतस्येतिज्ञापकाच॰ अन्यथाहिनलोपः कोइत्येवसूत्रयेत॥॥ सिति च॥॥ सि
तिप्रत्ययेपरे पूर्वंपदसंज्ञंस्यात् भसंज्ञापवादः॥ भवतष्ठक्छसौ॥ भवदीयः॥ मतोरप॰
ह्रस्वितिधरः॰ सतः प्राग्नोप्यकत्तिपयः॥ स्वादिष्वसर्वनामस्थाने॥ कृत्प्ययावधिष्वस्वादि
षसर्वनामस्थानेषुपरेषुपूर्वंपदसंज्ञंस्यात्॰ राजभ्यां राजभिः॥ राजत्वं राजता॰ सर्वनामस्था
ने तु॰ राजानौ॥ राजानः॥ सुवद्दस्रोधारयुद्दस्रइतिवरेसंज्ञायाङ्गपसंख्यानं॥ तमसोमत्वर्थे ल्प
इतिभसंज्ञायाअपवादः॥ चल्प्ययेनभवतेः शयोलुक्॥ यचिभं॥ यकारादिष्वजादिषुप्रत्य ८५

दिघवर्णनामख्यानेषु परतः पूर्वमपदं तस्मात्तगार्ग्यः॥ ततः वाविकर्षादिकृयोक्तं यथा भत्वाभत्वेनिर्दि
ष्टत्वस्तथाप्येवमवस्तुतो॥ नभोगिरिमनुमो वत्सुपसंख्यानं॥ नभ मात्वा वा वर्त्ते नेति भसंज्ञा भत्वाभा
वः मनुषस्ये अगिरसं स्वरंगिरः जनेरुसी त्सच वकुलस्य हणानुवर्त्तेम्न तेरूपसि द्धम्पवा॥ आदेश
प्रत्ययोरिति षत्वं हवणा वत्मस्थयोः हयवर्णकंव सुयस्य स्तः ष्टुषत्वे स्तः एवंद्वषु॥ णथः क्ष्म
धात्वर्थवद्गीन्तस्तुरूपादिवर्णयथासंभवं बोध्यः॥ इहांतर्वर्त्तिनी विभक्तिमाश्रित्य पदत्वे सति नलो
पः प्राप्ते नामत्वात्तु न पदत्वं॥ अत एव पदांतस्येति णत्व निषेधो न॥ अत्रोपोनइति तु न प्रवृत्तिः
अगसंज्ञाया अभावात् अंगस्येति चेन ताधिकारात् उपसंख्यानान्येतानि छन्दो विषयाणीति केचि
यदः॥ नभसौ मत्वर्थीतो नभसां नाभसं नौसौ मत्वर्थे प्रत्यये परे विधानान्नाम त्वाज्जश्त्वं न॥ उदके
नचथ तिवृधते उदधिस्थितः॥ क्षिप उदधि नौ भवन्ना स्माभिः तिनिपातनात् संप्रसारणाभावः॥ उद
कस्योदः संज्ञायां॥ उदधिस्थान्न दोषः॥ यशस्वी मत्वर्थे इति तिलंमतयोः विनिप्रभृतीनी चाविशि
ष्टंश्च तनमयतमत्वबहुलं॥ यथा देवदत्तशालाक्ष्यान्न आनीयतामित्युक्ते देवदत्तो नीयते
उदेश्यपनाव एवेदक प्राकीतत्वात्॥ अनम्ययादीनिछंदसि॥ एतानि छंदसि साधूनि भंप रस्मं

श॰कृ॰ त्ता विकाराद्यथापीरं रूढमध्यद्वारेषांसाधुत्वं विधीयते ते न था च वार्त्तिकं ।। अभय दं ज्ञाम पीति वक्तव्य
८६ मिति ॥ अथ समर्थगत्रं भत्वादुत्वं न अपसोविकारः स्यर्थेद्वाव द्वंद्वसीतिमयट् ।। एतेन मयट्ठेनयो
र्भाषायामित्युक्तेः कथं मिहमयडित्याशंक्य नएव निपातनमादिति वचनस्यासङ्कृत्परास्तः ।। सहस्रंभा
पत्रस्य [illegible] ।। इहत्रक्त नेति परस्मात्कत्वं । भत्वाज्जस्त्वाभावः ।। जस्त्वविधानार्थो याः पदसंज्ञा
याभत्वेन प्रतिबंधात् ।। तऊष्ठ वडुवचने ।। वहुत्वे एतत्स्यात् ॥ युद्धाः ।। कथं तर्हि दानराडिति ॥ अवय
वहुत्वस्यावयविनि आरोपाद्भविष्यति ॥ नद्येवमेकस्मिन्नपि हृष्ठेऽवकाशापत्तिः ।। तत्रारोपे प्रमा
णाभावात् । दारशब्देन नित्यवहुवचनांतत्वग्राहकको शादेवं दृष्य वहारं स्य चमानत्वेनवैष
म्यात् ।। द्येकयोर्द्विवचनैकवचने ।। द्वित्वैकत्वयोरेते स्तः ।। हस्त्रोऽट्टः ।। इदेद्येकश्चीसंख्ये प्रतीन
त्वसंख्येयपरौ ॥ अतएव द्वयेकयोरिति द्विवचनं । अन्यथा वहुवचनं स्यात् ।। एवं सूत्रेपि वज्रधि
तिसंख्यापामेव समूहवचनंत्वत्राप्रयाग तवूऊत्वे धर्मिआरोप्यहृतं । तत्फलं त वङ्कः पवेतर
तिवेष्टस्यवाचिनीनेहृयहृगामिति स्वघनमेव ॥ वस्कृती अघुंनस ॥ परत्वादेक वचनसंभवा तम ८६
त् ॥ यत्वत्रादशानः सख्याः सं ख्ये यदिति न सापोवाद मात्रं । अत्रश्लोक वार्त्तिकं ।। संख्या कर्मास्योप

ष्ठिवः कर्मच॥ दिवः साधकतमं कर्मसंज्ञं स्यात् चकारात्करणसंज्ञं च। करणशब्दानुवृत्त्यावक्ष
माणस्यान्यतरस्यांग्रहणस्याकर्षणेन वा संज्ञयोः पर्यायेण बे समावेशार्थश्चकारः। तेन
मनसा दीव्यतीति मनसा देवस्यत्र कर्मणि करणे तृतीया चेत्युभयं सिध्यति। मनसः सं
ज्ञायामित्यलुक्। किंच। अक्षैर्देवयते यं तदत्तेन स्यन्न सकर्मकत्वात् अणि कर्त्तुर्णौ कर्मत्वेन।
अणावकर्मकादिति परस्मैपदं चनेति दिकः स्यादेनतथादिसमावेशः नहि अक्षान्दीव्य
तीत्यत्र परत्वात्तृतीया स्यात्। तथाहि करणसंज्ञाया अवकाशः विदेवनाः अक्षाः करणत्वे
द्यकर्मसंज्ञाया अवकाशः। दीव्यंते अक्षाः भावकर्मणोरिति यगात्मनेपदे। अक्षानित्य
त्रत्वभयसंज्ञाप्रसुक्तकार्यप्रसंगेन परत्वात्तृतीया प्राप्नोति। अत्राऽऽहुः कार्यकालपक्षे
कर्मणि द्वितीयेत्यत्र परस्योपस्थानं तस्यानवकाशत्वात् द्वितीयेति। ननु दीव्यंते अक्षा
इत्यत्र कर्मण्यपि द्वितीयेति विकारणत्वस्यानभिधानात्तृतीया स्यात्। तथा देवनाः अक्षा इतिल्यु
टा करणस्याभिधाने पि कर्मत्वेनाभिधानात् द्वितीया स्यात्। मैवं। एकैवात्र शक्तिः सं
ज्ञाद्वयोनी॥ तथा चोभयत्राप्यभिधानमेव। तत्वनमिहितत्वं॥ परिक्रयणे संप्रदानम

शाहश ९९ तंवा स्यात्‌। शताय शतेन वा परिक्रीतः। परिशब्दः सामीप्यं द्योतयति क्रयोनामात्यंतिकं स्वीकर
णं नियतकालं तु तस्य समीपमिति भावः। आधारोधिकरणं॥ आश्रियंतेस्मिन्‌ क्रिया इत्या
धारः। अध्यायन्यायोद्यावेत्यादिना करणे घञ्‌। क्रियाश्रययोः कर्तृकर्मणोर्द्वारा तत्परंपरया
क्रियां प्रति य आधारः तत्कारकमधिकरणं स्यात्‌। कटे आस्ते स्थाल्यां पचति स्यादेतत्‌। साक्षा
त्क्रियाधारयोः कर्तृकर्मणोरेव कुतो नेयं संज्ञेति चेत्‌। न परत्वात्‌ कर्तृकर्मसंज्ञाभ्यां बाधित
त्वात्‌। अत एवाहुः कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां। उपकुर्वत्क्रियासिद्धौ शास्त्रेधि
करणं विदुरिति। अत एव भूतले घट इत्यादौ अस्तीत्यस्याध्याहारो निपतः॥ यथा पुष्पेम्पड्
त्यत्रस्पष्टं दृश्यते। अत एव च नञा सहकारकान्वयं वदंतः परास्ताः॥ त्रिविधं चेतदधिकरणमि
ति संहितायामिति तिस्रो भाष्ये। औपश्लेषिकं वैषयिकं अभिव्यापकं चेति। कटे आस्ते गुरौ वस
ति तिलेषु तैलमिति॥ अधिशीङ्स्थासां कर्म॥ अधिपूर्वाणामेषामाधारः कर्म स्यात्‌।
अधिशेते॥ अधितिष्ठति अध्यास्ते वा वैकुंठं हरिः॥ अभिनिविशश्च॥ एतत्पूर्वस्य विशतेरा राम ९९
धारः कर्म स्यात्‌। ग्राममभिनिविशते। अभिनिवेशश्चापि हः। न श्रानभवतीत्यर्थे अकर्मकोयं तत्रा

धिंकरणस्य कर्मसंज्ञा विधीयते॥ प्रवेशनार्थे तु सिद्धैव। परिक्रयणे संप्रदानमिति सूत्राद
न्यतरस्यांग्रहणमनुवर्त्तते। मंडूकप्लुतिन्यायेनाव्यवस्थितविभाषा चेयं। एतदर्थं ग्रामे निविष्ट
नामिति समर्थसूत्रे भाष्यप्रयोगश्च हमाने। तेन पापेभिनिवेश इत्यादि सिद्धं। इह सूत्रे नेर
स्याचनरस्य प्रतिपातनकरणमभीष्टशानुपूर्वीकस्य समुदायस्य विवक्षार्थं। तेनेह न। निविशते य
दि शूककशिखा पदे इति क्रमेन्व विवक्षायां तु नत्वा विभाषा वितव्यमेव द्वितीया या। उपान्वध्याङ्व
सः॥ एतत्पूर्वकस्य वसतेराधारः कर्म स्यात्। उपवसति अनुवसति अधिवसत्यावसति वा
ग्रामं सेना। वसेरशनर्थस्य प्रतिषेधो वक्तव्यः। अर्थशब्दो निवृत्तिवचनः। अधिकरणे षष्ठ्यो। वाच्य
वाचकभावः षष्ठ्यर्थः। भोजननिवृत्तिवाचको यो वसिस्तस्य नेत्यर्थः। ग्रामे उपवसति। कथ
मुपोष्य रजनीमेकामिति। कालाध्वनोरिति द्वितीया भविष्यति। कथमेकादशीं न भुंजीते
ति। उपपदविभक्तेः कारकविभक्तिर्भविष्यति। **कर्तुरीप्सिततमं कर्म॥** कर्त्रा पदार्थमिष्य
ते तमां तत्कर्मसंज्ञं स्यात्। यद्यपि पारार्थ्यत्वादसौ कर्त्ता तेनेच्छापारेण अमुसिद्धमिति तत्त्रिधा
नाद्यस्यते। तेन क्रियाफलशालित्वं पर्यवस्यति। क्रिया हि फलेच्छापूर्विकैवाविषयः। फलमेव

शद्द·१· त्विष्टतमं। तत्त्वधातुनोपात्तमिति तद्विशिष्टत्वेनोक्तो विषयोऽत्र संज्ञी। स च त्रिविधः कर्मकं च। निर्वर्त्यं
१०· च विकार्यं च प्राप्यं चेति त्रिधा मतं॥ तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितं। औदासीन्येन यत्
त्प्राप्यं यच्च कर्तुरनीप्सितं। संज्ञांतरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकं। तथा। यदसज्जायते सद्वा
जन्मना यत्प्रकाशते। तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितं। प्रकृत्युच्छेदसंभूतं किंचित्का
ष्ठादिभस्मवत्। किंचिद्गुणांतरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृता विशेषाणां सिद्धिर्य
त्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते इति। तत्र निर्वर्त्यं यथा· घटं करोती
ति· घटो हि असन्नेव जायते वैशेषिकादिमते· सांख्यादिसत्कार्यवादिमते तु सन्नेवाभिव्य
ज्यते इत्युत्पत्तिविशेषलक्षणं। सामान्यलक्षणं तु कृधात्वर्थोत्पत्त्याख्यफलशालित्वात्·
एतेन करोतेर्यत्नार्थकत्वमिति मतं प्रत्युक्तं। यतत इतिवदकर्मकतापत्तेः। तद्वज्जानातीच्छि
षु यत्वापाषाणपर्यन्तार्थाभ्युपगमेनापि निर्वाहः। लाघवेनोत्पादनमात्रं परत्वात्स्वकर्तृत्वस्य
क्रियत याकर्मवद्ग्रावादिद्विषसंगाद्य· प्रकृतेः प्रकृतिधर्मस्यात्मन उच्छेदे संभूतं प्राप्तं तद्य एम
था·काष्ठं भस्म करोतीति· गुणांतरोत्पत्त्या यथा· सुवर्णं कुंडलं करोतीति· इह भस्मकुंड १०·

ड्लयोर्निर्वर्त्यत्वमेवेति बोध्यं ।। प्राप्यं तु आदित्यं पश्यतीति । यथायुक्तमिति द्विविधं द्वेष्यमितिन र
छ अकथितं चेत्यपरं ।। संज्ञोत्तरत्र संगेचान्यत । द्विवः कर्मवेत्यादि नदित्यं सप्तविधं कर्मेति स्थितं
।। इदं च षष्ठ्येव यद्यपि विविधत्वनाख्याः क्रियाकृतविशेषोऽस्त्येव । अन्यथा कर्मत्वानुपपत्तेः ।। तथापि
प्रतिपत्तव्यतिरिक्तपुरुषापेक्षया विशेषो न गम्यत इत्युक्तं ।। विकार्ये तु काष्ठारीकर्ष्यं धात्वपा
त्तफलाश्रयत्वेपवशिष्यते । न चैवं तत्त्वं प्रकृतिविकृत्योरभेदविवक्षया निरूपयात्र तत्त्वस्याश्र
यता । यद्वा काष्ठानि विकुर्वन् भस्मोत्पादयतीत्यर्थः ।। तंडुलान् विक्लेदयन्नोदनं निर्वर्तयती
तिवत् । एतच्च सुबूह्यर्थः ।। पचिरिति निष्कम्पभाष्ये मुसादिनां न तत्तंडुलोदनं पचतीति द्वियोगेत
डुलनिष्ठविक्लित्तेरोदनोत्पत्तेश्चानुकूलो देवदत्तनिष्ठाव्यापार इत्यर्थः ।। तंडुलानोदनं पचतीत्ये
सेचत विक्लेदयतीत्यर्थः ।। ओदनं पचतीत्यत्रं तु विक्लित्त्या निर्वर्तयतीत्यर्थः ।। उक्तं च । सैवं धमा
च पुक्तं च कृत्याधात्वर्थाभावयोः न देकांशं निवेशे त्वव्यापारोऽस्य न विद्यत इति ।। तस्माद्ध्याव
चेत धात्वर्थाभावना इति पचित्वेन पस्तु पानाविक्लित्ति कर्मतया कारणं तया वा यथाय
थं संबध्यंत इति स्थितं । इदं च विधेयं क्रियायां धातुना कर्तुरपि वेरत्वादिशब्देन आभाष्यान

शकौप रष्टस्तत्त्वादेरपि प्रयोगोपाधिमात्रत्वात्· अधिशीङ्प्रदिवत्· एवं च तथायुक्तस्य जडस्वेहा वि
१०१ धाद्युपात्तफलाधारमात्रमर्थः ग्राह्ये येमेवत्वा· तद्यामेदेनफलेत्वेति· अनन्यलभ्यमा शब्दा
र्थ इति न्यायात्· अन्यथा तथायुक्तं चानीप्सितं चेत्योरपि वाच्यतापत्तौ गौरवं ज्ञेया त्रिकविरो
धाच्च· एवं च फलाश्रयः कर्मत्यवास्तां किं हि मूलेत्प वाशिष्यते। न चैवमुत्तरं। अग्रेमाणो वर्जेना
स्यतीत्य त्रमाणवकस्य पाचानसिद्धौ बाधितेष्वेप्सिततमम् इतिता वद्युक्तव्यां तस्मिं श्लोके
ष्योसाघीनयोः संग्रहार्थं तथायुक्तं। मित्यपि लिङ्गवलीयं अनीप्सितग्रहणं तु शकेप्रपलाख्या न
। तथा च कर्तृकमविभक्ताक्रमयोरप्याधारो वाच्यः। आधेयं वा व्यापारे फले न वाचयर
नि तत्र वस्थयाशास्त्रबोधवे षम्यामिति निष्पित्ते।। गोदोहनी· यत्का पक्व इत्यादि कर्त्तनानी
तु नामार्थे ऽभेराययान्तु रोधाधारपरतार्थः। फलमावनयोः कृविशेषणविशेष्यभावो वि
परीतु इत्य वधेयं। तथायुक्तं चानीप्सितं।। ईप्सिततमवक्रियया युक्तं अनीप्सितमपि
कर्मसंज्ञं स्यात्। ग्रामं गच्छन्तृणं स्पृशत्यनुपसर्पति· चौरान्पश्यति।। अकथितं च।। अपा राम
दानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। नन्वस्य छत्रातीत्यादो अतिप्रसंगो वा १०१

नंकर्तव्यं। दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सचते
तदकीर्तितमाचरितं कविना। नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च। द्विकर्मकेषु ग्रहणं कर्तव्य
मिति निश्चयः। इह प्रद्वीपत्रभेदेतितवङ्ः कृतः आगमशासनस्यानित्यत्वात्। सनाद्यंताधातवइकोय
णावीतिवत्। उपयुज्यत इत्युपयोगो मुख्यं कर्म क्षीरादि। तस्य निमित्तं गवादि। दुह्यादीनां मुख्यं कर्मणा
संबध्यमानमिति यावत्। तथा ब्रुविशास्योर्गुणेन कारकेण कर्मणेति यावत्। कारकाणां क्रियां प्रति
विशेषणत्वात्तत्रापि कर्मण एव प्रकृतत्वात्। यत्सचते संबध्यते। षच समवाये। चरितेत्। केचित्तु
पदस्येपादिक्षिः सहैनं धातुं पठन्ति षच समवाये इत्यत्र यस्य स्थार्यां वचीति तन्मते षच सेवने इत्य
स्यानुदात्तेतो धातुर्नाम अनेकार्थत्वात् समवाये वृत्तिर्बोध्या। अयथापि सं बध्नाते। कर्मव्यापारे प्र
विवर्तते। अत एव कर्तृपदस्य कर्मपदेनार्थकथनेन विरुध्यते। राध्यत्योदनद्रव्यस्य पच्यतद्रत्पने
नयथा। अमुत्राचार्यो रत्नानिष्ठविक्लित्तिर्भूमानाविशेषात्। कविना मेधाविना सूत्रकारेण तदकीर्ति
तमित्याचरितं व्यवहृतमित्यर्थः। अपूर्वविधाविति। पूर्वोक्तानामपादानादिसंज्ञानां विषयत्वे
नास्तीत्यर्थः। नचैवं वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषयेतिप्रसंगः स्यादिति वाच्यं। एकसंज्ञाधि

श.प्र. कारेणापराभ्यां हेतुकर्तृसंज्ञाभ्यां कर्मसंज्ञायां बाधितायां चकारः पूर्वयोग्रहणमनुमात्रोपलक्षणं। नेनव
१२ स्वमाणयोर्हेतुकर्तृसंज्ञयोर्विषये नातिप्रसंगः सूत्रेष्वकथितमिति कथननिवृत्तिपरायां नोदनायां
भूतकालो नाविवक्ष्यते। यथा पराजेरसोढः इत्यत्रासहिष्णुमाणस्यापादानसंज्ञा भवति अध्य
नात्पराजेष्यत इति तद्वेद्धावीत्याकुः। नद्धिंत्यां गुरूली त्यायधाक्र्नेविसर्वेसामंजस्यात्तानीवत्यो रि
तिष्ठीके गत्यर्थानामित्युक्तत्वे पत्तानामुपलक्षणं चकारेणानयत्यादयो गृह्यंत इत्यत्र कैयटः।
माधवोप्याह। नयतेः कर्षतेर्मेर्थेर्मुर्थेर्देङ्पतेः पचेः। नारोर्ग्रहस्तथा मोचेस्यात्संदीपेश्चसंग्रहः
कारिकायां च शब्देन स्वधाकरमुखेः कृन्न इति। एतन्निष्कर्षस्त्वकरिष्यते। जमेतोदाहरणानि
गोदोग्धि पयः। अविनीतं विनयं याचते। गामवरुणद्धि व्रजं। माणवकं पंथानं पृच्छति। पौर
वं गां भिक्षते। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते। शास्ति वा। अजां नयति ग्रामं। वहति
भारं ग्रामं। हरति वा। गमयति ग्राममित्यादि। जयतेः शतं जयति देवदत्तं। कर्षति शाखां ग्रामं
क्षीरधिं सुधां मथ्नाति। मुष्णाति शतं देवदत्तं। गर्गान्शतं दंडयति। तंडुलानोदनं पचति। ता एष
रयति कपीन्समुद्रं। ग्राहयति बटुं वेदं। त्याजयति कोपं देवदत्तं। दीपयति शास्त्रार्थं शिष्यान्। १२

मत्रादुहादीनामर्थनिर्वंधनेयं संज्ञा न तु स्वरूपाश्रया· अहमपीदमचीकथं चोद्ये इति तद्भाजनस्त्र
त्र्माप्ष्ये प्रष्ठिपर्यायस्य तु देरपि स्त्रिकर्मकत्वदर्शनात्· तथा च भट्टिः स्थात्तुंराणेस्मे रमुखो जगा
दमारीचमुद्दे वचनं महार्थं कालिदासोपि शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थम
भाषते वेति भारविश्च· उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधेन रेड्ढुः इति तथा च भट्टिर
र्थपरत्वाद्याचोरपि सिद्धा न तु स्वार्थत्वात्। यो रं वगामर्थं यतद्दतिवध्यात् न त्किंपादेः पृथग्ग्रहणेने ति
चेत् अत्राहुः अन्तु नयार्थो च नैं यनिः किं पंचा वते· विनयायानुनयती स्पर्थात् अक्तताहि याचेराप
ह्णात्तस्या नेकार्थत्वाद्विकर्मकपि सिद्धमिति चेत्· न· अर्थभेदेन शब्दभेद इति दर्शनमाश्रित्यानुन
यार्थस्यैव याचेरिह ग्रहणात्· अत एव हि नयतिग्रहणेनानुयात्र्थस्यापि तद्वतार्थत्वात्स्पष्टा
र्थं सिद्धे· पृथग्ग्रहणमित्यन्ये। चकारेणापचेर्ग्रहणमिति यन्माधवादिभिरुक्तं तन्मतभेदेनात
था च कर्मवत्कर्मणेति सूत्रे तुहिपश्चोर्वरुचिं मध्य कर्मकयोरितिवार्तिके व्याख्यावसरेय
चेर्द्विकर्मकता कैयटेन स्फुटी कृता। यत्तु कर्तुरीप्सिततममिति सूत्रेऽद्यार्थः पचिरिष्या
दिभाष्यं तत्तु मतान्तरेण· अन्यथान्तेदुत्तानोदनं पचतीति प्रयोगस्य यथाश्रुतस्यापप

शब्द प्र॰ वक्तो किंमुधाक्लेशेन। अत एव अकथितश ब्दो पद्यशब्दानार्थो गृह्यते तेन सपाणिनाकोऽस्यपाण्योर्दो
१०३ र्भिपद्यइतिपाणिकोऽस्यपास्यो रतिब्रुवंगः। कारणाधिकरणयोश्च पद्यस्यादि रवकाशः। न हि त
त्रास्य प्रसंगोऽदुहादिपरिगणनाद्धि अकथितस्त्वेक इत्यतः कर्मवत्स्त्रेऽत्र पचेर्हि कर्मकर्तां
ब्रुवतो हारदत्तस्य न द्रवत्वापि विरोधः मतभेदपरत्वात्। अत एव पविधात्र निरूपणेऽतं तंडुलानोदनं
पचतीति प्रयोगं द्विकर्मकत्वेनैव माधवश्चाहृतवानिति दिक्। ॥ तथा याहे द्विकर्मकत्वं वह
वोनमेति। अत एव न मादो कुलविद्या नामर्थेन शब्देन विविक्षावाः। पथास्यार्थि वक्तव्यानां पाणि
मग्नाहयामिनेनि कालिदासश्लोकेऽद्वर्धिस्य हेतुहृदर्थत यागतिबुद्धीतिसूत्रेणाणौ कर्तुः क
र्मत्वान्नमितियोजयित्वा गत्यर्थेनेति विभक्तिविपरिणामेन व्याचख्युः। अत एव च अति
ग्रहत्वं जनकाधत्तस्यघेनाद्धिर्हिदैत्यपुरं पिनाकी। नित्ताम्रमानोवजनमस्य बाह्रोर्हमन्त्रभां
जीद्रघुनंदन स्त्वदितिभहिप्रयोगो। त्रयमं गलायामिन्धं व्याख्यातः। अजिग्रहत अनेनम
नुषा भगवता त्रिपुरदाहः कृतः इत्यबोधितवानिति। युक्तं चैतत्। श्रीरघुपतिं प्रति नियोगक रम
थननो चित्ते न स्वरूपोपस्थापनस्यैव कर्तव्यत्वात्। एतेन अबोधयावितारं नाहि द्विहे वमादि १०३

सतां ग्राहयितुं शक्यत इत्याशंक्यातो नाग्रहेतुत्वार्थत्वात्· यद्वा· हविःशक्योत्कर्ममुनंतसमभिव्याहृ
तयोर्हि कर्मतायां भाव्यत्वे स्थितत्वात्सिद्धमेतदिति माधवः। ग्राहेर्हि कर्मताम्भ्युपगमय दर्शितं जायां
प्रति ग्राहितगंधमाल्यामिति न सिध्येत· तत्राहि एवं तु कर्तृत्वकर्मणोरुक्तिवक्ष्यमाणरीत्या प्रयो
ज्यघेतदूपे कर्मणि ल्युः स्यात्तथा वजीपया गंधमाल्ये प्रति ग्राहितापि निर्विग्रहैव कुर्वी हि वि
नया ता। निकतः शी घस्पभा छ्यस्थितत्वात्· मत्पविवालम्भिम पुंवद्भावी दुर्लभः। सिद्धांते तु ना
या प्रति ग्राहिते गंधमाल्ये यये ति वि ग्रहः जायानिष्ठरोरणविषयीभूत गंधमाल्यकर्मकप्र
तिग्रहणांतकर्त्रीमित्यर्थः। अन्यवत्सर्थांतर्भावेणोवविशेषणविशेष्यवैपरीत्येनैवैका
र्थीभावकल्पनात्· मासजानादिवत्· व्यपेक्षापक्षेतु अबद्धी विमस्यार्थे वद्ब्रीहो सर्वत्र
व्युत्पत्तं तावकल्पनाल्पैव· घात्वोद्दकमित्यस्य हि उदककर्तृकद्योपाधिकमोभूतमर्थः अप
रथः। रथकर्मकवहनकर्त्ता· उपहृतपशुः पशुकर्मकोपहारसंप्रदानी। उद्धृतौदना· ओदन
कर्मकनाक्त· न द्विवसायांतु जाया प्रतिग्राहितेत्यादिमित्यस्यतीति· पे व हरतेद्वीतिचकारेण

शद्वश· ता समुच्चितानां जयत्यादीनामकथितत्त्वविषयत्वेपि तथैववेति समुच्चितानामणौ कर्तुर्णौ
१०५ कर्मताभ्युपगमात्। गत्यर्थैः साहचर्यात् अत एव नार्थस्थिः पृथगेव संगृहीताः पुनश्चैतनतय
इणोकर्तृत्वस्यापि विवक्षायां प्रयोजकस्येहेतुत्वाभावणि चौडुले भन्वा तानवैवंदीपिग्रहणाचेय
र्थेऽत एव कर्मकत्वाद्वाणौ कर्तृत्वौ कर्मत्वसिद्धेरिति वाच्यं· तपं तासि विमतसा र्थकत्वात् शिष्या
स्तत्त्वंदीवयंति तान सोऽयं यतीति तदर्थः। नयैवं तानेः संगृहीतत्वाद्युपित्याजितैः फलमुत
त्वात्तेः सुम्मा हारं विपरिचितं त्याजितीरेवगस्येत्यापि निर्दर्शनत्वात्। पिगाचाप यत्या जयती
त्यर्थ इति केचित्। रह्वार द्रवाव्यर्थ्या विलक्षणत इतिवेत्· सुधाकरस्तुमतस्याप्यसमर्वैः परिग्रहात्। त्या
देनसा। कर्तुरीप्सिततमं कर्मतथायुक्तं चानीप्सितमिति सूत्राभ्यां सर्वमिदं सिद्धं। तथाहि· यथा
विक्लिष्टपसर्जनविक्लेदनं पचेरर्थः। तस्य आवर्तनं फलं द्विधाभाववर्तमिदं न तथाप्यजनोपसर्जनं तस्याज
नं दुहेः। हायनं याचेर्भिक्षेश्च· अंगीकारणामपियावेः प्रविशोपसर्जनमवस्थापनं रुधेः आख्यापन
नं प्रच्छेः। मोचनं चिजः प्रतिपादनं ब्रूञः तद्विशेषस्तु शासेरित्यादिः एवं चधातूपातस्या पारविषया राम
प्रयत्वं गवादेः स्पष्टमेवेति। अत एवाकर्त्रारस्त्वं पारानमुचराणि गोरोम्पि इत्यत्र परत्वात्क १०५

संतेतिभाष्यं स्पष्टं जनेः पूर्वकं प्रातिकार्थ इति पक्षे ऽवधित्वफलान्नयत्नयोर्युगपद्विवक्षायां धेरोश्र
व विभूता यागोस्मि त्रिधोक्तः पृथः स्वरणानुकूलाव्यापारसाम्लद्धषयिणी गोपनिष्ठप्रेरणोत्पन्थी
तः अनोच्यते ॥ कर्मणः शेषत्वेन विवक्षायां नमाषाणामश्रीयादिति च षष्ठी बाधित्वं स्वत्रे अपास
नस्य मात्रविवक्षायां तु पंचम्येव गोदोहाविशेषणान्वे तु षष्ठी भवत्येवेति न कश्चिद्दोषः तथा च
हृषष्ठीवत्सं बंधमात्रे द्वितीयार्थ इति स्थितं ॥ अथेदं विचार्यते ॥ कर्मणि विधीयमाना
लकृत्यक्तखलर्थाः किं द्विकर्मकेप्पी मुख्ये कर्मणि स्युर्गौणे वेति । अत्र भाष्यं । प्रधानकर्मण्या
ख्येयोलादीनाहुर्द्विकर्मणां ॥ अप्रधाने दुहादीनां ण्यंते कर्तुश्च कर्मणः इति ॥ अभिधाने इति शे
षः अत्र द्विकर्मणामित्यनेन नीवह्योर्हरते श्चेति च शब्दसमुच्चिताः कृषिर्नयत्यादय अत्र य
उच्यते । अन्येषां विशेषस्य वक्ष्यमाणत्वात् नया दुहादीनामित्यनेन कारिकोपात्ताः वचा
दस्समुच्चितेषु हेतुमणणिचंतानि गृह्यादयश्चोच्यंते ॥ ण्यंतेऽत्यनेन त्वगत्यादिसूत्रोपात्ता अश्वशब्द
समुच्चिता नाय्यादयश्च ॥ तत्र अणौ कर्ता णौ कर्म तस्याभिधाने लादय इत्यर्थः । तत्रापि बुद्धिप्र
त्यवसानार्थशब्दसमुच्चिताना माद्यादयश्च ॥ तत्र अणौ कर्ता णौ कर्म तस्याभिधाने लादय इत्यर्थः

श.वृ.प्र. न चापि बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मणी नियमतोऽन्तरेण तथा च भाष्यं कथिते ऽभिहिते
१०५ त्व विधित्स्व मतिर्गुणिलादिविधिः स परोक्षवृत्तेष्विनयुक्तिषु चाप्य गुणे तदनल्पमतेर्वचनस्य
रतेति ॥ अत्र प्रधानकर्मणि लादिभिरभिहिते गुणकर्मणि षष्ठीत्येकीयमतं दूषणापरः प्रथम
पादः त्वस्याः षष्ठ्याः विधिर्द्वितीयं त्वस्याप्यस्यमतिर्नेन्दुममेत्यर्थात् । सप्रयोगसाविस्तृतोपाव
सहिते दुह्यादेर्गुणकर्मणि लादयः गुणकर्मणि पुरुष षष्ठ्ठो पयः प्रभृत्यर्थत्वाद्दुहादा च
प्रधानं गवाद्युच्यते । एवं नेतृशब्दतः प्रयोजकव्यापारस्य प्राधान्यं प्रयोज्ये । न च बुद्धिप्रत्ययवसा
नार्थशब्दकर्मकेषु गुणकर्मणि एव स्यात् । एवं तेकर्तृश्चेत्यस्यमपरः इत्यनेन बाधादिति
वाच्यं क्रियपरत्वाहेतिभाष्ये णा मतौ तरता ध्यवसाया तो अन्वाय संग्रहः ॥ गौणे कर्मणि दुह्यादेः
प्रधाने नीहृकृष्वहां ॥ बुद्धिप्रत्यवसानार्थशब्दकर्मसु च स्यात् ॥ प्रयोज्यकर्मण्यन्येषां ण्यन्तानामि
हनिश्चितः ॥ न हृत्पकृष्वल घोनां प्रयोगो भाष्यपारगैः ॥ ॥ तत्र नीप्रभृतीनां प्रधानं कर्मस
बंधोत्तं रंगः इत्यादीनां तविपरीतां तेन नहंशेन्यायमितिहोनियमः इतरत्तु सर्वथा वनिकं ॥ ए.प.
कर्मणोदाहरणानि गां दुह्यते पयः दोग्धा । दुग्धा स्तद्दोहा । अजायाम नीयते नेया नीता सुनया । १०५

वोधयतिमाणवकधर्मं।माणवकोधर्ममितिवादेवदत्तोग्रामंगमयतिगमयितव्यं।गामिनःस्वग
मइति॥यत्तुकौमुद्यांदुह्याद्यर्थैलादिनाद्वन्द्वादीयसातीस्थहैराद्येनपठित्वाच्याद्यर्थेयोस्त्र
ख्येइष्टांदयोगौणाइत्युक्तंतन्नग्रहेपायोनिर्मूलएवजयाः इत्युक्तंरूशङ्कितपुरहस्तां
वासुक्तंइतरेषांतुद्विकर्मकतामात्रतात्पर्यकःपाठःप्याद्यर्थोदुह्यादयश्चेत्तुभयत्राप्यादि
शब्दःप्रकारेइतिसिद्धांताविरोधेनव्याख्येयं।यथाश्रुतेहिदंडिस्मिपुमिप्यांसर्वेषांप्यात्तत
थाचगौणौःशतंदंड्यंतामितिभाष्यंविरुध्येत।शतंत्वत्रप्रधानं।नगौणः॥अर्थिनश्चराजानो
हिरण्येनभवंतीतिवाक्यशेषात्।दंडिश्चेहग्रहतार्थोनतुनिग्रहार्थः।अतएवचत्वस्त
दायवाक्यसमाप्तिःयथानुशिष्टेनप्रधानात्तैतेरसंभवात्तनथापिच्छेदेपिप्रधानेस्यात्।इष्य
तेगौणात्तनथाचभारवि।पिनायविहृमतितास्फुरनागमथ्याहेवास्तेरमतनमंतनि।धर्मसंघे
इतिप्रेमनत्यजोरेष्पतयासुरदेश्रेदानिधिःक्षणोगाः॥यद्यपिअन्येतदंयथास्तचीनस्त्वगौणी
हावनकीयतेभावचनेनामनतेतत्पुदाल्हनं।नदपितएपतेकर्तव्यकर्मणाइनिसिद्धांता
तःयद्याकृतिस्तानेइतिगुरुखाचात्मनेपदीवोयदेवेतपठितःतस्मैरमुदाहरणं।बुद्ध्यर्थे

शब्दकौ. षुपलद्दयस्मोपपादितत्वात्‌। यत्तु श्रीहर्षः। पायुं कः स्वकीयं हंसमोहया हेतशिशुभ्रशपार्थिनो
१०६ त्रिदुर्वहेति। न हि त्वं शिशुनां वं ईषार्थिनेत्यप्रधाने कर्मवत्स्यथे वक्त्रीहायोगात्‌। बह्वपनिहि। अ
त्रथमाविभक्त्यर्थे वायमिति। न च वंहेकैः। अप्रधाने दुहादीनामित्युक्तेः। अतएव। काकपक्ष
धरमेत्पयाचितद्दक्षिकालिरामः॥ ॥कृत्यषष्ठीगुणामुख्याभ्यां कर्मभ्यां वाध्यते पृथक्‌॥ अवि
शेषाद्वितीयावक्तृतायामस्पगोरिति॥१॥ यप्रत्यये केन शक्ते नभित्रकल्पइयाभिधा। नशाक्य
नेतत्रपुक्रर्मकस्यैवोपजीव्यतं॥२॥ प्रधाने नियता षष्ठी गुणे तूभयथा भवेत्‌॥ इत्याहणोपि
कापत्रइति भाष्यात्‌ गुणाहृतं॥३॥ नेताश्वस्य स्रुघ्नस्य वा। इह प्रधाने कर्मणि। नित्या षष्ठी भाष्य
कारवचनात्‌ गुणकर्मणि वैकल्पिकी निस्थिता॥ नन्वकर्मकाणां प्राकृतकर्मभावात्कथं हि
कर्मकता। तथा चएपर्थकर्मणि। व्रलस्पपोक्त आस्पते माणवक इति। मासमिति॥ तत्स्योगोति
गतः॥ कर्मवचेत्तिन युक्तिषुचा थ्यग्णाद्भति लोके कर्मव ग्रहणं वव्यर्थमिति चेत्‌। न कालभावाध
गंतव्याः कर्मसंज्ञा स्वकर्मणामिति भाष्यात्‌। गंतव्योधा अधुगंतव्यः। अस्मादेव निपातनात्‌ उक्तत्वाच्छब्दस्य एष
परनिपातः। गंतव्यतया लोके प्रसिद्धस्य नियतपरिमाणस्य क्रोशयोजनादेर्ग्रहणार्थं गंतव्यग्र १०६

हरतोतेनाध्यानं स्वपितीति न भवति। मासमास्ते। गोदोहमास्ते। यावता कालेन गौर्दुह्यते तावन्तंका
लमास्त इत्यर्थः। क्रोशमास्ते। कुरून्स्वपिति। ननु मासं कालो पाधिरिति पक्षे गोदोहादेरप्यु
कोलत्वात्सिद्धं तथापि लोके मासादेरेव तथात्वेन प्रसिद्धत्वात्पृथगावग्रहणं। देशशब्दे
न वग्रामसमुदायविशेषः कुरूपं वालदयोऽस्त्येतदिति कैयटः। तेनाधिशीङ्स्थासामामित्यादे
वैयर्थ्यं नेति ध्येयं। वक्ता नाध्वनोऽस्य तत्संयोग इति तद्गुणाद्व्यपयोरर्थे आरंभणीयं। क्रोशं कुटि
लामास्ते। गुडधानाः सकर्मकार्थेच। मासमवेदमधीते। यथा। आसा इय स्तत्र वं कव्याप ने व
र्तते। तथा चोत्सर्गेणैव सिद्धं। मासमास्तनेन प्राप्नोतीत्यर्थात्। तथा चाहितीय भाष्ये। प्राक्
तमेवेदं कर्मेति। न चैवं सकर्मकेष्वतिप्रसंगः। लक्ष्यानुरोधेनाकर्मकाणामेवोक्तप्रकारा
भ्युपगमात्। आह च। कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमु
पजायते। इति हेलाराजस्त्वाहाकर्मकेष्वपि मासमीदृशं पचतीति भवत्येव। अत एवोक्त
सर्वैरिति। अकर्मकैरिति त्वविवक्षितमिति कैयटोपेक्षं। अस्मिन्पक्षे मासमास्ते कटं इति
करोतेरपि द्वितीयाप्रसंगः। तथापि कालादेरेवव्याप्य नेकर्मत्वं न तु कटादेरिति हेलाराजः।

श.प्र. अनभिधानं चेह शरणं॥ अधिशीङ्स्थासादिसूत्रापकं वोध्यं इह च कर्मणाभावे लकारे देवदत्तेनास्यते
१०७ मासो मासं वेति द्वयमपीष्टं स्यादेतत् भावे चाकर्मकेभ्य इति वचनान्मासादिकर्मकात्कथं
भावे लट् इति चेत् उच्यते अकर्मकेभ्य इत्यनेनान्तरंगेइच्छकर्मसु दृश्यते नन्तु बहिरंगं कालादि
कर्म कर्मणी त्यत्र तु प्रसक्तिपक्षाश्रयणादंतरंगासन्निधौ बहिरंगे कालादिकर्मणाभिप्रसक्तिरविरुद्धा
त्ता ति प्रसक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्थेति सिद्धांतात् अकर्मकैर्व हरिणा। शक्तिश्रमापसंख्यादेव
अधर्मो हि शिष्यते॥ क्रिया सुकालयोगेन प्राप्तो गोत्वमकर्मतेति॥ अतस्तेऽकर्मभिधातयु
क्तोद्भव्यैरकर्मकाःल एषकर्मणाभावे च निमित्तत्वायकल्पतइति एतेन मन्त्रे माघमपि घाभिधी
तियमुनांगं गोष्ठमं शेषयेति श्री हर्षप्रयोगोव्याख्यातः॥ ॥ गतिबुद्धिप्रत्यवसानार्थशब्दक
र्माकर्मकाणामणिकर्तास णौ॥ गत्याद्यर्थानां शब्दकर्मकाणां वाणौ यः कर्ता स णौ कर्म स्यात्॥
नियमार्थमिदं। णिजर्थेन आप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेवेति तेन पाचयति
देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये पूर्वप्रवृत्तकर्तृसंज्ञाया एवं निरपवादत्वेनाव्यवस्थानात्तृती राम
पा सिध्यति आह च गुणक्रियायां स्वातंत्र्यात्प्रेषणे कर्मतां गतः॥ नियमात्कर्मसंज्ञायाः स्वध १०७

णा॥ पिपीलिकाः पतन्ति॥ कर्तृः स्वधर्मे णान्तनीय इत्यर्थः॥ गमयति माणवकं ग्रामं॥ ग्रामकर्मकं यद्गमनं त-
दनुकूलव्यापाराश्रय इत्यर्थः॥ नीवह्योः प्रतिषेधो वक्तव्यः॥ यद्यप्येतयोः प्रापणमर्थो न तु गतिस्तथा-
पि विशेषणतया गतिरस्त्यविवाच्यक्तेति निविष्टेस्पेना वन्माशेणाप्राप्तिमत्त्वात्प्रतिषेध उक्तः॥ नाययति वा
हयति वा भारं देवदत्तेन· वहेरनियन्तृकर्तृकस्यैव प्रतिषेधः॥ नियन्तृकर्तृकस्य प्रयोज्यः कर्मेति
वक्तव्यमिति फलितोर्थः॥ वहंति वाहाः॥ वाहयति वाहान्रश्मिनः सूतः॥ यायायणा इत्यन्वतुगतिरेव
प्रायणशब्दार्थः॥ प्राप्तिगच्छतीति एकार्थप्रतीतेः तेन कालं यापयतीत्यादौ प्रयोज्यस्य कर्मतावि-
धानं बुद्ध्यर्थग्रहणेन ज्ञानसामान्यवाचिन एव ग्रहणं तेन तु तद्विशेषवाचिनः स्मरत्यादयः अत एव
स्मरयति शोकं संख्यानं क हिष्यते· बोधयति माणवकं धर्मं॥ प्रत्यवसानं भक्षणं॥ भोजयति आशय-
ति माणवकमोदनं॥ आदिखाद्योः प्रतिषेधो वक्तव्यः॥ आदयति खादयति वान्नं बटुना॥ भक्षेरहिंसा-
र्थस्य प्रतिषेधो वक्तव्यः॥ हेतुमति णिजन्ते विधि(रि)ति प्रतिषेधोप्यणौ विस्यदंसन्निधानान्महिषपः
तेन बुद्धिणिजन्ते पि भक्षयन्ते प्राप्तिमत्त्वात्प्रतिषेध उपसंख्यानं॥ भक्षयत्यन्नं बटुना॥ अहिंसार्थमि
ति किं॥ भक्षयति बलीवर्दाः सस्यं॥ भक्षयति बलीवर्दान् सस्यं हि वस्थानां यवानां भक्ष्यमाणाना

श॰ कृ॰ नांहिंसादृष्ट्यो॰ तस्यामवस्थायां तेषां चेतनत्वाभ्युपगमात्॰ शब्दः कर्मकारकं येषां ते शब्दकर्माणः॰ न
१०८ त्विह कर्तरि कर्मण्युच्यते ह्यारउत्पत्तेवकर्मशब्दः क्रिया पर॰ गतिबुद्धिप्रत्यवसानेन शब्दार्थेति वक्तव्येऽर्थश
ब्दात्कर्मशब्दस्य पृथगुपादानात्॰ अध्यापयति पाठयति माणवकं देवदत्तं जल्पति प्रभृतीनामुपसं
ख्यानं। जल्पयति विलापयति आभाषयति पुत्रं देवदत्तः दृशेश्चोपसंख्यानं। दर्शयति हरिं भक्तान्।
यद्यपि दृशेर्ज्ञानसामान्यपरत्वे बुद्ध्यर्थत्वादेव सिद्धं न थापि तान विशेषार्थतायां न सिद्ध्यतीत्युप
संख्यानमारंभे श्रावयति स्तोकं देवदत्तमिति तत्त्वशब्दकर्मत्वात्सिद्धं। शब्दक्रियाणामिति व्याख्याने
तु शृणोतेरुपसंख्येयं स्यात् तद्रूपतिक्रन्दत्यो ध्रुवति वेध्यं स्यात्॰ क्लापयति। क्रन्दयति वा देवदत्ते
न॰ दृशेस्तु भयथाप्युपसंख्येयं॥ शब्दायतेश्चोभयथा अतिवेध्यं अकर्मकत्वादपि प्राप्त्र प्रसंगः। अ
कलत्वादस्य कर्मणो न भावात्॰ कर्मान्तरायोगाच्च शब्दापयति देवदत्तेन। अकर्मकग्रहणा
न्नत्वयेषां कालादिभिः संकर्मन्तसंभवति ते ग्रह्यन्ते॰ नत्वविवक्षितकर्माणोपि॰ तेन मासयति
देवदत्तमित्यादौ कर्मत्वं सिद्धं। देवदत्तेन पाचयतीत्यादौ च न भवति॰ गत्यर्थाकर्मकश्लिष्ट ए॰म १०८
निसूत्रेप्येवं। अत एवाविवक्षितकर्मकेभ्यः पचिदरातिप्रभृतिभ्यः कर्तरि क्तो ना अन्यथा पक्कवा

न्दत्तवानित्यर्थे पक्वौदनइति स्यात्‌। जः कर्मणीति सूत्रे तत्र अविवक्षितकर्मणां असंभवत्कर्म
णां च ग्रहणं। अतएवाविवक्षितकर्मणां तभोवेलादयः इतीह सूत्रे च दत्तो गोरणाविल्पत्रत्तन
हपस्य तः इतिभावेनका इति त्रुवतोहादत्तस्यम नभेदपरत्वात्तद्धवो पाविरोधः इति दिक्‌॥॥
हृक्रोरन्यतरस्यां॥॥ हाचका चेति विग्रहः। हृ यक्कृश्चेतिवा। अनयोर्णौ कर्त्ता णौ वा कर्म स्यात्‌।
नवेति विभाषा सूत्रे अभ यत्र विभाषा खिदं वार्त्तिकं हरन्तापठितं। तथा हि। अभ्यवहारयति मा
णवकमोदनं माणवकेन वेसत्र अन्यत्र मानार्थत्वात्‌ प्राप्ते विकुर्वते बाजाः विकारयति बा
जान्‌ बाजैर्वैत्यत्राकर्मकत्वात्‌ प्राप्ते इत्यनयोः प्राप्ते विभाषेयं॥ अभिवादिदृशोरात्मनेपदे वेति
वक्तव्यं अभिवादयते प्राप्ते विभाषा। दृशोस्तु बुद्ध्यर्थत्वादुपसंख्यानात्‌ प्राप्ते। अभिवदति गु
रुं देवदत्तः। अभिवादयते गुरुं देवदत्तं देवदत्तेन वा। णिचश्चेत्यात्मनेपदं। परस्मैपदे तु अभि
वादयति गुरुं देवदत्तेन। दर्शयते राजानं भृत्यान्‌ भृत्यैर्वा। कर्मसत्ताभावपक्षे कर्मणो तरस्या
भावात्‌ कर्मणो। इत्यात्मनेपदमत्पत्र न णिचश्चेतीति भावः। यत्त्वत्र णिचश्चेत्येव युक्तं
त्तोरणाविस्य स्यतुनार्थं विषयः णिचाश्चयपुक्तमेषादिति तत्रैवोपपादितं॥ स्वतंत्रः

शब्द॰ कर्त्ता॥ क्रियायाः स्वातंत्र्येण विवक्षितोऽर्थः कर्ता स्यात् तथा च धात्वर्थव्यापाराश्रयत्वं स्वातंत्र्यं। आह च। धातुनो-
१०९ क्तक्रिये नित्यं कारके कर्तृतेष्यते इति। कर्मकर्तर्यप्यसौ दं फलव्यापारयोर्वैयधिकरण्यमात्रस्य चावो-
त्तत्वात् कस्मपरत्यागात्॥ विशकलितशक्तिपक्षे विशिष्टशक्तिपक्षे च कर्तृत्वं॥ निवृत्तप्रेषणं कर्मस्थक्रिया-
वप्रवीष्विजमि निवृत्तेव प्रधानभूतधात्वर्थ एव हि क्रिया। धात्वर्थे तत्र न पूर्वभावनार्थत्वात्। एतेन
न काणांक्रियासाच यनियमोऽपि व्याख्यातः। देवदत्तः पचति। स्थाली पचति। अनन्यलभ्यस्य शा-
ब्दार्थत्वादाश्रयो लकाराद्यैः। द्विदत्तेन यव्यते देवदत्तस्य पोष्यत्र आश्रयत्वं छिद्रविशिष्टे विक्लित्त्यनुकूलव्या-
पारत्वस्य शेषे विशिष्टवाच्यत्वेन स्वरूपमर्तागमयो दृष्टामाख्याने॥ तत्प्रयोजको हेतुश्च॥ तस्य कर्तुः प्रयोज-
को हेतुसंज्ञः स्याद्यात् कर्तृसंज्ञः। संज्ञासमावेशार्थश्चकारः। कुर्वन्तं प्रेरयति कारयति हरिः। हेतुत्वा-
त्तच्छापारे हेतुमति चेति णिच्। कर्तृत्वात् कर्तरि लकारः॥ ॥ इति श्रीशब्दकौस्तुभे प्रथमस्याध्या-
यस्य चतुर्थे पादे तृतीयमाह्निकं॥ प्राग्रीश्वरान्निपाताः॥ अधिरीश्वरे इत्यतः प्राक् प्राग्रि॰ पाता इ-
ति अधिक्रियन्ते। नं ग्राह्या अपायात्। ते न पूर्वे निपातसंज्ञाः। सतः पश्चादुत्पादि संज्ञा इत्यर्थो तत्संज्ञा- राम
समावेशः सिध्यति अन्यथा गत्युपसर्गकर्मप्रवचनीयसंज्ञानां निपातसंज्ञया अपर्यायः स्यात्। १०९

नंचादीषमाणं तथाग्रहणमात्मयर्थमिदमन्यथा ऽशिवाद्विति पंचम्येव दिकशब्दादेपाल्किं ते ना नच प्र
शब्दाल्लेपप्रसंगः ॥ चादयोसत्वे ॥ सत्त्व इत्येतत्पोर्दिग्धेया लाभेनान्वया पत्तेः रेफ विशिष्टग्रहणं किं ईश्व
रेतोस्तुनकत्वना विल्प प्रस्यानित्या येनाव्यधि त्वं मा भूत् चत्वक्रनत्क मात्क रेफः प्रत्यासत्त्याः प्रमित
सिद्धेः ॥ अव्ययीभावस्याव्ययत्वं ज्ञानं भावा नवा तो समासेष्वव्ययीभाव एवेति नियमार्थस्यादिति वा
च्यो स्वयं स्वमाम्नित्यायमाश्रित्यानियमार्थत्वं व्यावणो मापेक्षया प्रत्यासत्तेर्विधार्थता याश्रयत्वाप्र
त्वात् ॥ अनव्यव्ययलोके निम्न ने अव्ययात्स्थक लोकादीनां ग्रहणमसुपप्रधत्तमिति दिक् ॥ चादयोसत्
त्वे ॥ चादयो निपातसंज्ञाः स्युः ॥ न तद्रूपे ॥ निपातत्वात् द्रव्यत्वं चाचावा इत्यादि ॥ च त्व प जङ्गणो यत्र
सर्वनाम प्रयुज्यते ॥ स्मि मिस्मुम् ने सोर्थो भेदात्वेन विवक्षितः ॥ जिरू स्वङ्गा च पिद्यामि तिवा अस त्वे
किं पशुना यजेत पशुशब्दस्यारिः वा समत्वयद्राम्याप्रविसन्नुदाहरणं ॥ नचानप्रकृति व स्तुकारण
मित्यमिर्देशात निपातत्वं कुर्वोर मितिवाच्यं अतिदेशस्यानित्यतायाः क्रल्लकमहत्वएवोपपादि
तत्वात् ॥ प्रसज्यप्रतिषेधः किंवा नीतिवाः ॥ विज्ञातीति विज्ञः ॥ इह क्रिया विशिष्टद्रव्यवाचकतया कि
याया प्राधान्यत्वाभावात् निपातत्वास्यात् ततश्च विशेषणत्वस्यापि द्रव्यस्य संज्ञास्यात् प्रयोजनं म

शब्द॰ सर्वनामाव्ययसंज्ञायामिपुरुक्तत्वात्। अथवादयः च। वाह। अह। एव। एवं। नूनं। शश्वत्। युगपत्। भूयस्। कूप
११० तः प्रश्नवितर्कयोः शंसा स्वयं। एवं स्वयमेव यदपि। कु विदिति मूर्धयः। योगप्रशंसा सातिमावेषु च। नो इति शंका
यां नेन्निश्चयार्थे तोनरकं पतामः। नेद्वेवमायुजन्तेन देवाइत्याशोतुनइ इति पदद्वयं पठ्यते तस्मान्निपात समुदा
यार्थतो द्ध्यः॥ निपातेर्थ इति निपातनिषेधः प्रतिषेधविचार समुच्चयेष्वपमिति तु शाकटायनः। चेतच
गाः अर्थं चेव र्वो।गा त। समुच्चयादौ त्वननुबंधः इदं च निपातेर्थ्यदीत्पत्रपूकृटीमविप्यति। कच्चित्। यन। नह
निश्चितनिषेधे। हेतह वेंनु कं पायी चामा। किं। मा। की। एतौ निषेधोमाकि नेंश न्मा कीरिषन्मा कीमेशा। श्कि
वटेन। किं। मेमा वितनिषेधे। माङ्। माङि लुङि। ति विशेषणार्थो ङ्कारः॥ माभवत्तमाभविष्यती त्यत्र तु नि
स्तुर्वधीमाशवृः। नञ्। नकारोनलोपोनञ इति विशेषणार्थः॥ न स्पेत्सुक्रे तयामनस्पत्र इत्युन्नापिमा
त्नन्चमिद्धा तेपिमित्रोणापुत्र इति अमेगं वारयितु अल्पम्पुत्रा पद इत्युन्नापदाहित्विन पूर्वपदेन नञोवर्शपि वि
शेषणीयत्वात्तेनैव प्रामनवुत्र स्यापिसिद्धेः। किंनकारेणेति वाच्यं। नैकधा। नामिकर्मीकृतनैकनीवृतेत्या
दौ निषेधार्थेन नशब्देन सह सुपेति समासमिति व्याप्तिं वारयितुं जिज्ञासा प्रायावश्यकत्वान्नञ्चा पूर्वेव राम
वृ समाविशेषणोपि अन्यार्थे जितस्यनिपातस्यैवग्रहणान्नतु ह्यद्याचारितार्थनकारस्यतद्दिन स्यापीतितुश्च ११०

ग्रंथस्योक्तिः संभवीबोधनं ॥ यावत् तावत् त्वे चे एतौ वितर्के ॥ औषट् वौषट् स्वाहा वषट् स्वधा ॐ तथा हि
रुक्कु खलु किल अथ स्तुष्टु आदहे तिहिं सोपक्रमकृत्स्नने पूः आदह स्वधा मन्त्रितपत्रं तु परकारा आदि
तिपृथक्पर्यंति उपसर्गा विभक्तिस्वरप्रतिरूपकाश्च ॥ अवदत्तं विदत्तं च अवदत्तं वाश्किमीरि ॥ हदत्तमनुद
त्तं च निदत्तमिति चेष्यते अवउपसर्गेनत्र इति घोषत्वं न भवति उपसर्गप्रतिरूपकत्वे प्युपसर्गत्वात्
विभक्तिरूपकता यथा अहंशुभं अहंयुः शुभंयुः ॥ अहं शुभमोयुसः ॥ चिरेण अंतरेण चिराय चिरात् अ
कस्मात् चिरस्य मम ममत्वं गतः राज्यस्य वेलायां मात्रायां मित्या ॥ एतेन गोयेकेन विनीतो वामिति वा
त्योनं ॥ वामित्यस्यावास्य युस्मयु वामित्यर्थो ॥ तस्या हस्ता अस्मेत्याहीनि तु निर्हत प्रतिरूपकाणि ॥ स्वरास्तु सं
बोधन भर्त्सनानुकंपापादपूरणप्रतिषेधेषु यथासंभवं बोध्याः अयये हि आ एवं मन्यसे इ इंद्र पश्य
इदृशाः उउ तिष्ठा ऊ ऊष रवी ज्ञेवपति ॥ एइतो भवा ओ आ व पा [illegible] ऐ औ एते मंत्रस्तोभाः ॥ पश्चिति मं
म्यार्थे बोधनं यंति पशुमंन्यमानाः ॥ शुक्रमिति शीघ्रं चैवपथा कथा वैस्यनावशे [illegible] स्पाट अंग हे है
भोः अये इत्यादयः संबोधने घेति हिंसाप्रातिलोम्यपादपूरणेषु ॥ विषुइति नानार्थे ॥ एकपदे इत्येक
स्मावर्थे ॥ निहत्य रीनेकपदे ॥ पुनरिति कुत्सायां ॥ कुत्सितमवद्यं वारयतीति पुर्ह्वां उः ॥ पुनि तिष्ठान मि

श॰दृ॰प्र॰

१११

निशाकटायनः। कुत्सितं कसति गच्छतीति पल्कसः। अस्मीत्यहमर्थे। त्वामस्मि वच्मि विदुषां समवायोऽत्र
तिष्ठति। आतङ्क इति इङ्गतो पीत्यर्थे। इत्यादि आकृतिगणोऽयं॥ प्रादयः॥ एते निपातसंज्ञाः स्युर्नत्वसत्वे·
प्र·परा·अप·सं·अनु·अव·निस्·दुर्·वि·आङ्·नि·अधि·अपि·अति·सु·उत्·अभि·प्रति·परि·उप·एते प्रा
दयः·तत्र निस्दुस्इमौ सांतौ·निसस्तपतावनासेवने इति निर्देशादित्युपसर्गस्यायतौ विति सूत्रे
वृत्तिः। निरः कुषः। सुडुरोरधिकरणे इत्याद्यनुरोधाद्रेफांतावपीति तत्रैव सूत्रे हरदत्तः। अद्रष्वेकि
।विः पत्ती। पराः सेना॥ उपसर्गाः क्रियायोगे॥ प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः गतिश्च॥ प्राद
यो गतिसंज्ञाः स्युः क्रियायोगे। पुल्लिंगोऽयं गतिशब्दः। गतिरनंतर इति लिंगात्· अव्युत्पन्नश्चायं। कि
न्तो वा न क्तिन्विदीर्घश्चास्येति तन्न प्रवर्तेते। अत एव निर्देशात्·उपसर्गसंज्ञया सह समावेशार्थ
श्चकारः। अस्य धापर्यायत्वात्॥ तेन प्रणीयमित्यादौ णत्वं कृत्स्वरपदप्रकृतिस्वरश्च सिध्यति· नि
पातसंज्ञायाः समावेशः प्राग्ग्रहणेन साधित एव· इह च क्रियायुक्ताः प्रादयस्ते प्रत्येकं गत्यु
पसर्गसंज्ञाः। योगग्रहणं सामर्थ्यार्थं· तेन प्रपद्यकृते प्रकृतमित्यत्र गतिरनंतर इति स्वरो न·क राम
मतिः क्रोधं प्रत्यगतित्वात्· कृज्जर्थे विशेषकत्वेन तस्यार्थेऽव·तथा·प्रवृद्धो भावः प्रभावस्तत्राश्रिनी। १११

सुकोनुपसर्गइतिस्वरेण॰कर्मणिक्तांतंप्रत्युपगतिन्वात॰अनर्थविशेषकत्वेतस्यादेव॰तथाप्रहृष्टौभावः
स्वभावस्यप्रश्निनिर्भिन्नोपसर्गइतिघञ्जसिद्धः।एवप्रागायस्यप्रभिषावयतीत्यादौप्रकृत्यर्थगतस्वक
र्षाभिमुखेद्योतकतायाणत्वषत्वेपि।।प्रत्येविशेषकत्वेतस्मेनिवोधनानिपातसंज्ञातुक्रियायोगंवि
नाप्यस्ति॰एतदर्थमेवाहिप्राग्रयइतियोगोविभक्तः।तेनप्रागस्मादाचार्यःप्राचार्यइत्यत्रानपयपूर्व
पदप्रकृतिस्वरःसिध्यति॰उपसर्गसंज्ञायांमरुद्वृधस्योपसंख्यानं।मरुत्वःउपसर्गसंज्ञाविधानसा
मर्थ्यादिर्जंतत्वाभावेप्यत्रउपसर्गोमइतितत्वेप्रवर्तनस्त्याज्जः।एवंचमरुद्वपतीत्यत्रणत्वमपिप्रा
प्नोति।तस्मान्नत्वएवसंज्ञावक्तव्या।अतएववृद्धिविधिरैच्चनभवति।निपातसंज्ञातुनास्त्येव।तेन
तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरेकृते।मरुत्तशब्दोमध्योदात्तः।निपातत्वेतुआद्युदात्तःस्या
त्।नचोपसर्गोप्याभिवर्जेपितिफिटसूत्रात्शेषतात्स्वस्थंशंक्यं।निपाताआद्युदात्ताइत्येवान्तिकै
ऽभेःप्रतिषेधमात्रार्थत्वात्।आरंभात्हितिहारदत्तादयः।अतएवनाभेरित्येवसूत्रपतंमास्तुवानसर
वि।एवादिषुअभेःसूपठन्वाद्रित्यपिवोद्यमा।एवंचूतपूर्वंमरुद्यामितिमरुत्तशब्दस्तुत्पादनेऽप्या
र्यांतरंबोध्यं।तत्रचनपःपित्वमेवसम्यक्।नत्रितिनित्त्वपाठस्तुकाशिकाग्रामाहिकः।अन्यथा

श.दृ.प्र. मध्ये शरुस्पाघुसान्तना पत्तौ प्रकृतसूत्रस्थ कैयटादिविरोधापत्तेः नत्वर्थीयप्रकरणे तेनो नित्यं मध्ये
११२ शरुस्पाघुसान्तनांचावलंबपत्रत्तो अंयथप्रकृति पिता: एवं ताद्दिन्न हि हिंसो विभाषेतास्पदोपद्यमानपर्व
नशरुस्पाघुसान्तत्वेतुहदे धापि सिद्धिनिमहिबयस्या निमित्तस्पेतिपर्वेश रुस्पाघुसान्तत्वात्. अवदृस्पा
द्धि धातुपसंख्यानं । अद्दामिदादिपागस्पन्ता अद्देति निपातनाद्दा सिद्धं । अंतःशदृस्पाड्. किवि धिप्रा
त्वे धूपसंख्यानं. एतद्वां नरपरियहे इत्यत्र भाष्ये स्थितं ॥ अंतधोऽअंतर्द्धिः अंतर्हेयान. हेतेरत्सूर्वस्मे
तिणत्वे एवंवीं नरदेशइतिनकर्त्तव्यं । देशे तद्भुआदित्वास्पत्वाभावात् । अयनं चद्दस्पापि न कर्तव्यं ॥
कृत्सवइति सिद्धे । देशे तद्भुआदित्वाबोध्येतिकैयटः । देशे निषेधार्थे सूत्रद्वयमिति तु हरदत्तः ॥ प
ह्रहयेपि अंतर्णयति अंतर्भावाणीता दोयथायथं ण बेवोध्यं ॥ स्तुच्छो प्रतिषेधोन क्षिपिनत्वा
णत्वेष्वामुलमंडलेषां उपसर्गोत्वलक्षणो रितिनु मनं. एतद्वयो ननामापान तना । न सुड्स्पो केवलाभ्या
मिति सूत्रस्पावबोधात्स्यत्वात्. अन्यथाऽतिस्तुलमभिवस्य बनु मनस्यात्. तत्वसुदन्तं. अवत्त्रपसर्गोरिति
तत्वेमाभूत. षत्वङ्ः स्थितिः प्रक्रियाज्ञानालाडुस्थो । सुसिक्तं । सुमिक्तं । सुस्तुतं. सुपूजायामिति तत्वकर्त्त
व्यमेव. पूजायामिति विशेषणाश्रं. तेन सुषिक्तं किं नवाजेत्यादौ षत्वं भवत्येव. कथं तर्हि फलवद्भाव शम
नोऽद्भुतकथंभावति रो हिताः नेवा गानानां कथंभावाः प्रादुर्भ्यंति कथं च नेति । प्रत्येनेरसुपसर्गत्वप्र ११२

र्गं प्रादुर्भावे मित्यत्र प्रादुर्भावे मित्यत्र शब्दः षः पृथग्ग्रहणा प्रसुक्तं ॥ एतेन प्रादुष्यंतीति पठित्वा प्रत्युक्तं ॥ उरः सुप्र
गत्रिकपूर्वस्य स्पते रूपमगोस्तुनो तिङ्त्यादिना षत्वमिति व्याचक्षाणाः परास्ताः । उरःप्रभृतीनां याः षत्ववि
धौनि षेधात् स्पते रर्थे प्रपत्रकृतानां बंधाच्च । णत्वे । तुदीनां । उरोगः ॥ एतेन उरःपस्पाणीत्वे नेति केचिदितिव
उत्वा सिद्धां तेणत्वमिति प्रत्याख्यातः पराहता ॥ गतिश्च ॥ अयं कारिका शब्दस्योपसंख्यानेन कारिकाकृत्स्य का
रिकाकृतं । यत्कारिकाकरोति । तिङ् । चोदात्तवतीति । तिङ्चोदात्तवतीति निघात । निपातत्वादव्ययत्वेऽसति
विभक्तेर्लुक् । कारिका क्रियामर्यादास्थितिरित्यर्थः । यत्न इत्यपरे धात्वर्थ निर्देशः इति आद्गुल्यस्तु क
र्तरि ण्वुल्तंतः कारिका दासीतिय प्रश्लोकवाचीतयो र्न ग्रहणं । क्रियायोग इति कारिका शब्दस्य विशेष
णा क्रियाप्रवत्तेरेव ग्रहणात् । पुनश्चनसौ छंदसि गतिसंज्ञाविति वक्तव्यं । पुनराधेयं । गतित्वात्समासः
कृदुत्तरपदप्रकृतिस्वरेणाद्युदात्तं । एतिधेयशब्दस्योदात्तः ॥ पुनः कृत्यःसुनवामः । इहापि गतित्वात्समासः स्व
रस्तु षष्ठ्य द्वाद्देशाकृतिगणत्वादेतोदात्तत्वं ष्फाटके त्यंतोदात्तः पठ्यते । शेष निघातेन पुनः शब्दो नुदा
त्तः । गतिर्गताविति निघातं य दनष्टति । काक्रकपरत्वात्सस्य प्राप्तता मस्यते । चनो हितः । वा परेत्रैकस्य
त्पसुनतत्वान्निपातत्वोदा ह्युदात्तस्य चनः शब्दस्य गतिरनंतर इति प्रकृतिस्वरः ॥ ऊर्यादिच्चिडाचश्च ॥

श॰ह॰प॰
१९३

एतेगतिसंज्ञाःस्युःक्रियायोगेॐकृद्वृत्तियोगेद्विजन्मावौविहितौ॥तस्माद्दचर्याहर्यादयोपितघोगएवप्रयु
ज्यं॰तेनाम्पत्रअनभिधानाच्चनत्राथाविःप्रादुःशब्दोमुख्यात्मेषांकरोतिनेवयोगइतिमाधवादयः
यद्यपिसंज्ञाविधौप्रत्ययग्रहणेतदन्तविधिर्नास्तितथापीहसामर्थ्याद्विजन्मतद्ग्रहणान्नहिप्रत्य
यमात्रस्यक्रियायोगःसंभवतिस्वार्थिकत्वेनानर्थकत्वात्॰वेरथाविल्वाद्यान्नीकृत्॰शुक्लीकृत्य॰
पटपटाकृत्य॰इहेदमवधेयंश्रोषड्डादीनांस्वाहान्तानांचादिष्वपिपाठाद्क्रियायोगेपिनिपात
त्वं॥आविःशब्दस्यसाक्षात्प्रभृतिषुपाठाल्कृञोयोगेविकल्पः॥कृद्वृत्तियोगेत्वनेननित्यमितिकथंतर्हि
वारुणीमदविशंकमथाविष्कृतस्तुषोभवदसाविवरागइतिमाघः॥अभ्यग्रुपपहिलोलतिङ्क्तायुग
लीयोभयस्यकुमागमाविपितिवानिरंकुशाःकवयइतिहरदत्तः॥वस्तुतस्तु॰नेहदोषलेशमपिपश्या
मः॥तथाहि॰गतित्वाद्यातोःप्राकृप्रयोगंप्राप्नोतीतित्वदीयपक्षेपपक्षप्रसर्वस्वांतत्रभाष्यवार्त्तिकयोरे
वनिराकृतप्रायं॥तेप्राग्धातोरितिसूत्रेहिद्विधाव्याख्यातंप्रयोगनियमार्थंसंज्ञानियमार्थंचेति
तत्राद्यपक्षेप्राक्चप्राक्चप्रयोक्तव्याःधातोःप्रयुज्यमानाःसंज्ञांलभन्तइतिस्थितोइममेवपक्ष एप
सूत्रमाश्रित्यानुकरणंचेतिसूत्रे॰तिनिपरमितिप्रत्याख्यातंएवमेवच्छंदसिपरेपिव्यवहिताश्चेतिसू १९३

दृष्टमपि प्रत्याख्यातं॥ अत एव तत्र पाणिनिसूत्रेषु कर्तृकृत्या लिवीरतानीति भाष्यं कर्तृकर्मणोश्च भूकृ
ञोरिति सूत्रे ख्याद्यम वमिति भाष्ये वृत्तिग्रंथे च्व्यर्थयोः स्वाद्येन भूयत इति वृत्तिग्रंथ शुभंग वतेन
नेन सूत्रे शामादिकतां वरत्वाद्येन सम्भूयत इति पाठः कर्तव्य इति दिग्दयन् हारस्त्रोप्य पाक्षिः
पत्नी तरेरपि परिहारा भवंतीति स्यायेन संता नियम एव देसर्वे स्पष्टा मनस्पात· एते नवपरो राम स्वन्
हर्वा चकार च्चलने व वु रिति महिं तस्य प्येिता कथमपि पुरुष्णति कालिदासः समर्थिताः नवपुरो
व्ययमित्यस्य सूत्र मात्र विषयत्वमिति भ्रमितव्यं॥ कृञो नधिकारा ता त्वग सा हं पुरो धाये त्वा दिश
योगाद्येति दिक्॥ जरी भरी भरी एते तत्र प्रोंगीकारं विस्तारे च वैनाली धूसीए वो विस्तारो शकली·
स्त्र सकलार्धसंकला· ध्वंसकला· एते चत्वारो हिंसायां· शकलाकृत्येत्यादि· हिंसित्वेत्यर्थः॥ गुलुगुधा
पीडार्थे गुलुगुधाकृत्य पीडयित्वेत्यर्थः॥ मज्ञा महार्थेः फलफली॥ विक्ली· आक्ली एते विकारे अलो
षी केवाली॥ सेवाली॥ शेवाली॥ वर्षाली· ममसममसा· मस्ममसा एते हिंसायां॥ वृषट्॥ वौषट्। स्वाहा· स्व
धा· पांपी॥ कृत्रण विलापेपां पीकृत्य· कृत्वा विलप्येत्यर्थः॥ प्राडुः प्राकट्ये प्रतशी प्राध्ये॥ श्रत्कृत्य॥
आविः प्राकट्ये· आविःकृत्य॥ गणत्वे त्वं न्येपि सत्य हीना॥ तथा हि पांपाली: संकला· केवाली·

श०कृ०प्र० एते हिंसायां। वार्दली· पर्दी· नी आनंदी· एते धात्वाशये हिंसायांच॥ इत्यूर्यादयः॥ ॥ अनुकरणं चानिति
११५ परं॥ गतिः स्यात् क्रियायोगे। खाड् इति कृत्वा अनितिपर किं। खाडिति कृत्वा निरष्ठीवत्· प्रति हितात्
त्वेव प्रयोगनियमपक्षे धातोः प्राक्प्रयोगः स्यात्· अनुकरणत्व जात्याक्रांतस्येति शब्देपरे घेनि षेधः
तेन श्रौषड्वौषडिति कृत्वा निरष्ठीवदित्यत्र श्रौषट् शब्दस्यापि निषेधः। एतानियमपक्षेतु अनिति
तिपरे हलोनकर्तव्यो इति प्रसत्तां प्राप्नेर्वा भावात्॥ आदरानादरयोः सदसती॥ कृमा इति
सदैत्यलः। सत्कृत्य· असत्कृत्य· प्रीति पूर्विका प्रवृत्ति स्थानादि विषयात्वरा आदरः अवज्ञया प्रवृत्त्यानु
दासुपेक्षा त्वनादरः। एतयोः किं सत्कृत्वा· असत्कृत्वा शोभनम शोभनंच कृत्वेत्यर्थः॥ भूषणोऽलं॥ गतिः स
त्तं स्यात्॥ अलंकृत्य। भूषणो किं अलंकृत्वा ओदनं गतः। पर्याप्तमित्यर्थः॥ अनुकरणमित्यादयश्चयो
योगाः स्वभावात्कृञ्विषया इति माधवः॥ अंतरपरिग्रहे॥ स्पष्टं। अंतर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्रहे
किं। अंतर्हत्वा मूषिकां श्येनो गतः। परिगृह्य गत इत्यर्थः॥ अत्रेदमवधेयं। हत्वा गमनं द्विधा· हतं तत्कर्तृका
परिग्रहं वेति॥ आद्यमुदाहरणं। द्वितीयं प्रत्युदाहरणं। अपरिग्रहे इति वज्रयोगोपाधिर्नत्वाप्य एप
को विनिविष्टमिति। कणेमनसी श्रद्धाप्रतीघाते॥ गती स्तः। कणेहत्य पयः पिबति॥ मनोहत्य ११५

लोपा रः सप्तमीश्च निरूपकोऽभिपातः। अभिवाक्यातिशयं वर्त्तते मनः शाब्दो ध्येयं। अतिशयेनाभिनय
नत्रिर्ह्वेति पूर्येते पिवृतीत्यर्थः। तत्र श्रुत्र ह्यात्र पगमान्नस्तीत्यातो धातुगतिसमुदायगम्यः। अ
द्धाप्तनीयते किं कृतो हत्वा गतेः। मनोऽहत्वा सुस्मन्तं हुत्वाव रूवाकणः। तस्मिन्नहृत्वेत्यर्थः। मनः
शब्दकृद्धा यंतस्मि। पुरोमयं। पूर्वाधरावराणामिति मुस्मारितोऽपि ग्रत्ययात्तोऽप्ययंतिथाश्च तः पुः
रातृ्णो गानिसंज्ञः स्यात्। पुरस्कृत्य। नेमसृरमोऽरिति सत्वं। अग्रयं किं। पूर्वा पुरः कृत्वा। अस्तं वा अ
स्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। अव्ययमित्येवा अस्तं काण्डं क्षिप्तमित्यर्थः। अच्छगत्यर्थ
वदेषु। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिगत्याभिमुख्यमुक्त्वा चेत्यर्थः। अव्ययं किं। न
दमच्छं गच्छति। अदोऽनुपदेशे। अदः शब्दस्य दादिः प्रोऽनुपदेशे गतिः स्यात्। अदः कृत्य। अदः क
त्वं। परार्थप्रयोगेऽदप्रयोगो वचनेति तु देदमुदाहरणं। अनुपदेशे किं। पराङ्गतिकथनेमाद्य तु अ
दः कृत्वा गतः। तिरोऽन्तर्धौ। तिरोभूय। अन्तर्धौ किं। तिरोभूत्वा स्थितः। पार्श्वतोभूत्वेत्यर्थः। विभा
षा कृञि। प्राप्तविभाषेयं। तिरोऽन्तर्धौ विभाषा तु ह्यधेः। तिरः कृत्य। तिरस्कृत्य। तिरः कृत्वा इत्यादि ति वा
सत्वं। उपसृष्टा हृग्णात्तु न सत्वं। नहि धौ गतिग्रहणात्तु हृद्देः। तिरस्कृत्वा काष्ठं। केचित्त्विहापित

शश्प्र· सत्वमिद्धं ततः पराभवे तिरस्कारश्च प्रयोगं वानुरुंधानाः सत्वविद्योगतिग्रहणं निवर्तयंतीति माधवः
११५ उपाजे·न्वाजे॥ एतौ कृञि वा गतिसंज्ञौ स्तः विभक्तिप्रतिरूपकौ निपातौ विभी दुर्बलस्य सामर्थ्य
धानेवर्त्तेते· उपाजेकृत्य उपाजेकृत्वा· अन्वाजेकृत्य अन्वाजेकृत्वा· उपष्टंभ्येत्यर्थः॥ साक्षात्प्रभृती
नि च॥ एतानि कृञि वा गतिसंज्ञानि स्युः अर्थे इति वक्तव्यं· साक्षात्कृत्य॥ साक्षात्कृत्वा· असा
क्षाद्भूतं साक्षात्क्रियते चेत्तदायं प्रयोगः नतु साक्षाद्भूतस्यैव रूपांतरापादने· अंतेषु तद्व
विश त्रिषिधाद्र्यो दिह्नीति नित्यैव संज्ञा तेन लवतीकृत्येत्यत्र मांतत्वं न भवति॥ नि छि विकल्प
त्वनियोगेन हृगणो निपात्यते· यद्यातलवणं शरसुले वणमिति मांतःआदेशः॥ तथा च साक्ष
पूर्व्व विप्र निषेधः॥ शोच्छिहितः साध्वं लवणंकृत्य· लवणंकृत्वा लवणीकृत्येति॥ तंत्रयं ताच्चे
तयोः पाक्षिके लवणामा देशे समर्पणं॥ परेणा विविक्तल्पेन मुक्ते नद्यं तत्त्वनित्या संतेतिन क
श्चिद्दोषः॥ इह हस्तो वशे प्रभृतयो विभक्तिप्रतिरूपका निपातः याद्रशविः शद्वयोरूपं हित्वात्प्राभे
विभाषा॥ साक्षात्· पृष्ठ्यादि चितेति मनी व्यापारे· विनाकृत्य· भङ्गा आलोचना प्रशंसा मंगलेष्वपि एन
यं॥ उ वने नियुक्ते तत्त्वा दस्पर्शंसायां च अग्रे मेनि हृहः साहित्यपयोः आस्था· श्रद्धा· प्रातर्यावीजयज्जि॥ ११५

क्रियायां। प्रातरुहीवी जरुहे निरुहि क्रियायां लवणों ऊष्मा। शीतं॰ उदकं आर्द्रं लवणा हीनो पेवानोंग
तिसंज्ञास्य नित्योगेन मानत्वं निपात्यते॰ मात्रा ईशो वेत्युक्तं। अग्नौ। वशे॰ विकेपने। विकसने॰ प्रहसने॰
प्रतपने॰ प्रादुस्॰ नमस्॰ आविस्॰ आकृतिगणोयं॥। अनत्याधान उरसिमनसी॥ एतौ निपातौ कृ
ञि वा गतिसंज्ञौ स्तः। उरसिकृत्य। उरसिकृत्वा॰ अभ्युपगम्येत्यर्थः। मनसिकृत्य॰ मनसिकृत्वा॰ निश्चित्ये
त्यर्थः। अत्याधानमुपश्लेषः तस्मिन्न॰ उरसिकृत्वा पाणिं शेते। मध्येपदे निवचने च॥ एते त्रयः कृञि गति
संज्ञा वा स्युरनत्याधाने। मध्येकृत्य॰ मध्येकृत्वा॰ पदेकृत्य पदेकृत्वा॰ पदेतावेतौ निपातौ। निवचनं व
चनाभावः। अस्याविशेषेण एवं तत्ता निपात्यते नत्व संज्ञा से नित्योगेन॰ व्याख्यानात्॰ निवचनेकृत्य॰
निवचनेकृत्वा। वाचं नियम्येत्यर्थः। अनत्याधाने किं। हस्तिनः पदे कृत्वा शिरः शेते। नित्यं हस्तेपा
णावुपयमने। एतौ निपातौ कृञि नित्यं गतिसंज्ञौ स्तः उपयमनो दारकर्म। तत्त्वेको स्वीकारमात्र
इत्यन्ये। हस्तेकृत्य॰ पाणौकृत्य कन्यां। महाभाष्ये तु वा। उपयमने किं। हस्ते कृत्वा सुवर्णं गतो भू
त्यः॥ प्राध्वं बंधने॥ प्राध्वमिति बुधान्मान्तमव्ययमानुकूल्ये वर्तते॰ तत्कृञि नित्यं गति
संज्ञं स्याद्बंधनहेतुकं चेदानुकूल्यं। प्राध्वंकृत्य॰ बंधने किं। प्राध्वं कृत्वा प्रार्थनैर्हित्वानुकूल्यं

श.र.प्र. कृत्वेत्यर्थः॥ जीविकोपनिषदावौपम्ये॥ कृञि नित्यं गतिसंज्ञौ स्तः॥ जीवयतीति जीविका जीवनोपा
११९ यः॥ जीविकामिव कृत्वा जीविकाकृत्य॥ उपनिषदमिव कृत्वा उपनिषत्कृत्य॥ गतिसमासस्यानि
त्यत्वे विस्पष्टार्थमुपमानिष्ठत्वाद्गतिनामाश्रियते न एवं तद्वशाद् प्रयोगः॥ औपम्ये किं॥ जीविकां कृ
त्वा॥ ते प्राग्धातोः॥ ते गतिसंज्ञा धातोः प्रागेव प्रयोज्याः॥ छन्दसि परेपि॥ व्यवहिताश्च॥ स्पृष्टं हरिभ्यां
यात्यो कृष्णा॥ आमंद्रैरिंद्र हरिभिर्याहि॥ इह संज्ञानियमपक्षे विभाषोच्छिन्ना॥ ते इत्यनेन पा
दीनुपनिबध्य येनानस्वरूपेण प्रागपि धातोः प्राक् प्रयुक्तानामेषां पूर्वे सूत्रे कृत्वा क्यप् तथा
संज्ञाविधानात् अस्मिन् पक्षे छन्दसि परेपि व्यवहिताश्चेति सूत्रद्वयस्य नितिपरग्रहणं च म
कर्त्तव्यमिति स्थितेः॥ सुकृतं करोतीति भाष्यं च संगच्छते॥ प्रयोगनियमपक्षे तु कृत्यत्स्तु इति
वृत्तिलेख इति न समर्थनीयं स्यात्॥ तत्र प्रबलः॥ निरूकारणाभावादनव्ययस्य प्राक्प्रयोगे नि
र्तीनिमेयोः परिशेषाद्व्यवधाने सिध्यतीति॥ तर्हि स्यादप्राप्तौ व्यवहिते पुनः संभवात् तत्कृद्ग्रहणमि
ति पूर्वस्याविग्रहणाच्च॥ इष कृत्स्वगतिसंज्ञकत्वे यथा उपसंहृत्य इत्यत्र विन्नः विन्नसंहृत्योपसंज्ञी॥ राम
त्वाद्येनिरिक्ता धातोः किं॥ प्रकृतेर्मैत्वाचिकीर्षादित्यत्र मनः प्राक्प्रयोगो माभूत्॥ कर्म ११९

प्रवचनीयाः॥रीश्वरात्प्रागिदमधिक्रियते॰ कर्मेति क्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः॰ बाहुलकात्कर्त्त
र्यनीयरामस्य च भूते। तेन सम्प्रति न क्रियां तद्द्योतयन्तीति लभ्यते॰ आह च॰ क्रियाया द्योतको नायं सम्बन्धस्य
न वाचकः॥ नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः॥ इति॰ तथा हि॰ शाकल्यस्य संहितामनु प्रावर्ष
दित्यत्रानुना न क्रियाविशेषो द्योत्यते॰ अनुभूयते ख्यवमित्यादौ यथा। नापि विषयो वर्षसम्बन्ध उच्यते॰ द्वि
तीयैवेनस्योक्तत्वात्॰ नापि प्रादेशं विपाशि लिखति विमाय परिलिखतीत्यत्र विशब्देन मानक्रियेव
क्रियान्तरमाक्षिप्यते॰ कारकविभक्तिप्रसङ्गात्॰ किन्तु संहितां सम्बन्धि वर्षणमिति द्वितीयावगतः सम्बं
धो लक्ष्यलक्षणभावरूप एव तस्यावगमात्सम्बन्ध एवानुना विशेष्येव्यथाप्यते॰ क्वचित्तु क्रियागत
विशेषद्योतकेपीयं संज्ञा वचनात्प्रवर्त्तते नेष्ठ श्रुतायामानि तिक्रमेणो वेतियथा॥ अनुर्लक्षणे॥
लक्षणे द्योत्येनुः कर्मप्रवचनीयसंज्ञः स्यात्॰ लक्षणेत्थंभूतेत्यादिना सिद्धे हेतोस्तृतीयांबाधि
तुमिदं सूत्रं तथा हि॰ लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशः यो न हेतुः वृक्षमनु विद्योतते विद्यु
दिति॰ हेतुतृतीयाया अवकाशो धनेन कुलमिति॥ संहितामनु प्रावर्षदित्यत्र हेतुभूते संहि
तोपलक्षितं वर्षणमित्यर्थः हेतुभूते लक्षणे परत्वात्तृतीया स्यात्॰ पुनः संज्ञाविधानसामर्थ्या

श॰वृ॰श॰ द्वितीयैवभवति आह च हेतुहेतुमतोर्योगपरिछेदेनुनाहृते । आरंभाद्याधृतेशास्त्रात्तृतीयाहेतुलक्ष
११७ णेति । ननुत्वत्तृतीयार्थेइतिसूत्रेणागतार्थेनाशंक्या । नसपुरस्तादपवादान्यायेनसहयुक्तेऽप्रधानइ
त्येतन्मात्रबाधकत्वात् ॥ तृतीयार्थे ॥ अस्मिन्द्योत्येनुस्तत्कर्मत्वं स्यात् नदीमन्ववसितासेना नद्या
सहसंबद्धेत्यर्थः ॥ बिन्दुबंधनेस्मात्कर्तोक्तः । हीने ॥ हीनेद्योत्येनुः स्यात् अनुहरिं सुराः । हरिइति
योगिकापकृष्टेनूपसंबंधवंत इत्यर्थः । उत्कृष्टादेवद्वितीयानन्त्वपकृष्टात् शक्तिस्वभावात् उपो
धिकेच ॥ अधिकेहीनेचद्योत्येउपः स्यात् उपखार्यांद्रोणः । खारीतोधिकोद्रोणोस्तीत्यर्थम
स्तीतिफलितोर्थः । यस्मादधिकमितिसप्तमी ॥ हीनेउपहरिंसुराः ॥ अपपरीवर्जने ॥ एतौवर्जे
नेद्योत्येस्यातां अपविष्णोः परिविष्णोः पंचम्यपाङ्परिभिरितिपंचमी । वर्जनइतिद्विव
चनात् द्विपंचमीसहित्वेनकर्मप्रवचनीयनद्योतिते विवर्जनेभवत्येव उभयोर्विविधानसा
मर्थ्यात् वर्जनेकिं परिषिंचति सर्वतइत्यर्थः । अत्रोपसर्गत्वात्षत्वं । आङ्मर्यादावचने । आ
ङ्स्यात्मर्यादाशब्देयस्मिन्नसत्येउत्पत्तेतत्रत्यक्तेत् आङ्मर्यादाभिविध्योरित्यत्रोपात्तोप्य राम
र्थइत्यर्थः आमुक्तेःसंसारः । आबालेभ्योहरिभक्तिः । लक्षणेत्थंभूताख्यानभागवीप्सासु ११७

प्रतिपर्यनवः। एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः॥ लक्षणे। वृक्षं प्रति पर्यनु वा वि-
